
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

5

2447

दृशप्रतीत्यनुदयापत्तेरतो घटत्वसमानाधिकरणपटत्वसमानाधिकरणद्वित्वेऽवच्छेदकत्वमवगाहत इति वक्तव्यं तत्र च
द्वित्वसमानाधिकरणघटत्वं पटत्वं वेति विनिगमनाविरहात् प्रतियोग्यंशे भासमानतावच्छेदकघटत्वपटत्वयोरप्यवच्छेदक
त्वावगाहनौचित्यात्त्रयाणामेवावच्छेदकत्वप्रसक्तौ तेषां चैकधर्मावच्छिन्नापर्याप्तिकत्वरूपविरोधात्त्रयत्वादिरूपोभयधर्मावच्छि
न्नाभावरूढघटपटोभयत्वावच्छिन्नाभावस्यापि केवलान्वयित्वं स्यादिति चेत् केचित्तु यद्यपीति समाधत्ते तथापीति। स्वातन्त्र्येणा
पीति। प्रतियोगिनिष्ठविशेष्यतानिरूपितनिरूपितप्रकारताप्रयोज्यत्वमवच्छेदकतामांशस्यातन्त्र्यमयंभावः। घटत्वे
न घटपटोभयं नास्तीत्यत्र घटत्वे द्विविधमवच्छेदकत्वमेकं द्वित्वधर्मितावच्छेदकत्वेनापरं च अधिकरणत्वेन तत्र प्रथमावच्छे
दकतायास्तदभावीयप्रतियोगिविशेषणतापन्नत्वावच्छिन्नावच्छेदकतात्वरूपेण घटत्वपटत्वद्वित्वैतत्त्रितयपर्याप्तत्वात्तदव
च्छेदकं तत्त्रित्वं द्वितीयावच्छेदकत्वस्य घटत्वमात्रपर्याप्तत्वात्तदवच्छेदकं घटत्वनिष्ठमव्यक्तित्वं तथा च प्रतियोगितावच्छेदक
तापर्याप्त्यवच्छेदकताव्यापकावच्छेदकताकपर्याप्तिकावच्छेदकताकनिरूपकताधिकरणत्वे वाभावस्य विरोधात् घटपटो का
भयाभावीयप्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकताव्यापिकाया घटत्वपटत्वद्वित्वेतत्त्रित्वनिष्ठाया घटपटोभयव
त्त्वमिति प्रतीतिसिद्धघटपटोभयत्वावच्छिन्नाधिकरणतानिरूपकतावच्छेदकतापर्याप्त्यवच्छेदकतातत्पर्याप्ति
कायातादृशत्रित्वनिष्ठानिरूपकतावच्छेदकतान्तर्भावात् तादृशोभयनिष्ठाधेयत्वरूपानिरूपकतातन्निरूपिताधि
करणताघटपटोभयाधिकरणे वर्तत इति न तादृशोभयत्वावच्छिन्नाभावस्य केवलान्वयित्वं घटत्वेन घटपटो

॥३९॥ भयं नास्तीति प्रतीतिविषयाभावप्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकतायास्तादृशाश्रितत्व घटत्वनिष्ठत्वव्यक्तित्वयोः
सत्वेन घटत्वेन घटपटोभयवदीति प्रतीतिविरहेण तादृशावच्छेदकताव्यापकावच्छेदकतापर्याप्तिकावच्छेदकताकनि
रूपकताया अप्रसिद्धत्वेन विरोधिनोऽभावात्तादृशाभावस्य केवलान्वयित्वमिति गएकदेशीमतानुयायिनमेतोऽप
थ विषयताया विषयस्वरूपत्वेऽपि घटादिरूपविषयताया विषयतात्वेनैव स्वरूपसंबंधेन घटादिवृत्तित्वं न घटत्वा
दिनेति घटत्वादिना विषयत्वं नास्तीति प्रतीतिविषयाभावद्द्रव समवायित्वेन स्वरूपसंबंधेन वाऽत्वाभावस्य घुनादा
वावच्छेदकत्वात्तादृशाभावस्य लक्षणघटकत्वसंभवेऽमूलस्य मतविशेषपरतयाऽऽलापनमनुचितं॥ न च तथाऽपि मल्लोकेऽम
धिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं तस्य न संभवति समवायित्वस्य प्रतियोगितासमानाधिकरणत्वादिति वाच्यं॥
प्रतियोग्यंशे प्रकारीभूतधर्मावच्छिन्नाया प्रतियोगिनिष्ठाधेयतानात्मनवच्छेदकत्वस्य तादृशाधर्मावच्छिन्ननिरूपकताका
धेयत्वाभावस्य वा प्रतियोगिताव्यधिकरणत्वच पदार्थत्वात्समवायित्वादौ तादृशविषयतात्वावच्छिन्नाधेयतानवच्छेद
कत्वस्य तादृशविषयतात्वावच्छिन्ननिरूपकताकाधेयत्वाभावस्य च सत्त्वात्तदवच्छिन्नाभावस्यव्यधिकरणधर्मावच्छि
न्नप्रतियोगिताकत्वात्क्षतेरिति चेन्न। प्यथेसादिग्रंथस्य कूटघटितलक्षणाभिप्रायकतयाऽऽरम्भात्तत्रान्तत्वाच्च साध्याभावे
साध्यसमानाधिकरणसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्व विशेषणस्यावश्यकतया समवायितया वाऽ
त्वाभावस्य विषयताया विषयस्वरूपत्वे समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकतयातदन्यत्वविरहात्। न च तत्रा

पि समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वविशेषस्यावश्यकत्वात्तस्यापि लक्षणघटकत्वं संभवतीति वाच्यं ॥
समानाधिकरधर्मावच्छिन्नाभावीयप्रतियोगिताभेदस्य साध्याभावीयप्रतियोगितायां निवेशकत्वे तदनावश्यकत्वात् ॥ इ
सतइति यद्यपि प्रमेयसाध्यके संयोगाद्यवच्छिन्नसमवायित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावः सुलभस्तथापि
वस्तुगतिमनुरुध्येदं । वन्हित्वेनेति । अथैतादृशाभावप्रदर्शनं किं स्वरूपसंबंधेन प्रमेयसाध्यक उत समवायसंयोगाभ्यां
वानाद्यो निर्वन्हावित्यसंगतेः स्वरूपेण तादृशाभावस्य केवलान्वयित्वात् । नांत्यः संयोगसमवायादिसंबंधावच्छिन्ना
भावस्य गुणसामान्यादौ वर्तमानतया वन्हित्वेनेत्यसंगतिरिति चेन्न । संयोगादिना प्रमेयसाध्यके जलत्वादिहेतुके
संयोगादिना प्रमेयसामान्याभावस्य गुणादौ सत्वेपि साधनसामानाधिकरण्याभावाद्वन्हित्वेनेत्यसंगतं । न च जल
इसेव वस्तुमुचितं न निर्वन्हावितिशंक्यं । जलत्वगुणत्वसत्वादिहेतुकस्य सद्धेतुसाधारण्येन तद्धेतोः । वस्तुतस्तु कूट
घटितलक्षणे भावानां दैशिकविशेषणतया वृत्तित्वस्य मयवश्योपितत्वात् स्वरूपसंबंधेन प्रमेयसाध्यकस्यैवो
भिप्रायकमेवेदमिति ध्येयं ॥ वन्हिभिन्नत्वेनेत्यादि । ननु वन्हिभिन्नत्वेन वन्हिगगनान्यतराभावीयप्रतियोगिताया
वन्हिभिन्नत्वेन वन्ह्यभावीयप्रतियोगिताभिन्नत्वेन वन्हिमात्रे निरुक्तासंभवात्कथं तस्याः साध्यतावच्छेदकसमनैय्य
त्यमितिचेन्न । अव्याप्तिवारणाय साध्यतावच्छेदकसंबंधावच्छिन्नाधेयताविशिष्टप्रतियोगितात्वेन समनैय्यसस्य विव

स्पणीयतयातेनरूपेण तादृशप्रतियोगितायां वन्हिमात्रनिष्ठत्वादेतदभिप्रायेणैव तन्मात्रनिष्ठत्वमात्रकथनमपि॥
॥४०॥ वस्तुतस्तु नायमाभासोऽवतरति विषयितया वन्हेः साध्यक एव तयोक्तत्वं वन्हिभिन्नत्वेन वन्हिगगनान्यतराभावी
यप्रतियोगित्ववन्हिभिन्नत्वेन वन्ह्यभावीयप्रतियोगित्वयोरैक्याभावात्॥ एतेन पूर्वकल्पेता दात्म्यसंबंधेन साध्यक
त्वानुरोधेन साध्यतावच्छेदकसंबंधावच्छिन्नसंबंधितायाः विवक्षणाऽवश्यकत्वेन दर्शितप्रतियोगितायां गगनसा
धारण्येपि न क्षतिः॥ विषयितासंबंधेन प्रमेयमात्रसाध्यक इति॥ इदमत्रचिंत्यं संयोगेन प्रमेयसाध्यकेप्यप्रसिद्धिसं
नु भवात्तावत्स्य यत्तौ धावनंस्य यत्नि चनत्र संयोगेन गगनत्वेन प्रमेयसामान्याभावस्तथेति त्रांक्यं तस्य हेतुसामानाधिकर
ण्याभावात्॥ स्वरूपनियामकसंबंधेन गगनस्य संबंधत्वात् तन्न स्वरूपनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्व
मत्तात्मिप्रायेणेदमितिवाच्यं विषयिताऽपितथात्वेन तत्संबंधावच्छिन्नाभावप्रदर्शनासंगतेरितिपरंतु विषयितायाः
वृत्तिनियामकत्वमताभिप्रायेणेदमिति स्ववधेयं घटत्वादिनावन्ह्यभावादिरवेति हेतुसामानाधिकरण्यघटकवृत्तौ सं
बंधनिवेशनमभिप्रेसेदं जन्यानां कालत्वानंगीकरणेन वातेन वन्हिसाध्यके समानाधिकरण्यधर्मावच्छिन्नवन्ह्यभाव
स्य कालिकसंबंधेन हेतुसामानाधिकरण्येपि न क्षतिः॥ अयमात्मेति॥ अथायमात्मात्मज्ञानादिसाध्यत्वात्मत्वसामान्या
भावकारणायप्रतियोगितायां साध्यतावच्छेदकानवच्छिन्नत्वमेपोवोद्देयं न चैवमपि द्रव्यत्वाभावमादाय दोष इति वाच्यं॥

साध्यनिष्ठत्वस्यापि निवेशात् ॥ न चात्मत्वनिष्ठत्वव्यक्तित्वावच्छिन्नाभावमादाय व्याप्तिरिति वाच्यं ॥ साध्यतावच्छेद
कानवच्छिन्नत्वमित्यनेन साध्यवृत्तिधर्मानवच्छिन्नत्वस्य विवक्षणात् ॥ यत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणं
साध्यवत्तन्निष्ठावच्छेदकतानाक्रान्तत्वस्य तदर्थत्वान्न प्रमेयसाध्यके तादृशाभावाप्रसिद्धिः ॥ घटत्वपटत्वोभयाभावोऽप्र
मेयसामान्याभावस्य तादृशस्याप्रसिद्धेरेवं च साध्यनिष्ठत्वं न देयमेव ॥ एतेन प्रतियोगितायां साध्यनिष्ठत्वनिवेशे वि
शिष्टसत्तावांजातेरित्यादावतिव्याप्तिरिति निरस्तं तादृशद्रव्यत्वाभावमादाय तद्वारणादिति चेन्न ॥ हेतुसामाना
धिकरण्यविशेषणापेक्षया गौरवात् ॥ यत्तु स्वाधिकरणधर्मावच्छिन्नत्वमेव प्रतियोगितायां देयं न त्ववच्छिन्नत्व
सामानाधिकरण्योभयसंबंधेन धर्मविशिष्टान्यत्वरूपमेव स्वविशिष्टेति न देयमिति न गौरवावकाश इति तन्न
समनियताभावैक्यमते घटत्वेन धूमाभावस्य घटत्वेन वह्न्यभावाभिन्नतया वह्निरूपप्रतियोगिसामानाधिकरण्य
मादायातिव्याप्तेः ॥ न च यत्सामानाधिकरण्यानिवेशेपि समनियताभावैक्यमतेऽतिव्याप्तेरतल्लक्षणवक्ष्यमाण
तयातौ ब्रूमिति वाच्यं ॥ तथापि लक्षणद्वयानुरोधेन यत्सामानाधिकरण्योक्तेर्लक्षणान्तरत्वाच्च न क्षतिः ॥ एते
न यत्सामानाधिकरण्यमपहाय प्रतियोगितायां गगनावच्छिन्नत्वनिवेशेपि समाहितः ॥ न तत्र व्याप्तेर्वारणं त
स्फलमिति ॥ यद्यपि वह्निसाध्यकेपि चरमक्रियात्वाभावस्य लक्षणघटकतया तस्य स्वविशिष्टे लघिकर
णाप्रसिद्धेरव्याप्तेस्त्वरिणंतत्कं संभवति तथापि महानसानुयोगिकधूमसंयोगस्य धूमांशे वृत्तिनियामकता

पाअग्रे ग्रंथकृतां प्रतिपादनान्महाकालत्वं तादृशाभावविशिष्टं हेतुघेतरणं संभवतीति न तत्राव्याप्तिरिति ध्येयं॥
॥४१॥ एधियाघटद्वयेति। तादृशाष्टद्व्यातिरिक्तं द्व्यमात्रमेव परिभाषितं तेन यत्किंचिद्घटद्व्यातिरिक्तत्वस्य सकलद्व्यसा
धारण्येपि न क्षतिः। द्व्यं विशिष्टसत्तादिसाधारणे द्व्यत्वसामान्याभावस्य कालेवैशिष्ट्यसंभवात् स्ववैशिष्ट्यांशे संबंधानिवेशा
देतावदनुधावनं। यदि सादिविशेषस्य नेदमसाधारणप्रयोजनमिति शंकते। यद्यपीति। नन्वेकार्थसमवायसंबंधेन कपि
संयोगात्मकाभावस्य जातौ वैशिष्ट्यसंभवान्नाव्याप्तिः॥ न च परंपरासंबंधानां संबंधत्वनिराकरणान्नेदं युक्तमिति शंक्यं॥
अ सवाप्यकारणे दैविध्यानुरोधेन समवायेकार्थसमवायान्यतरसंबंधेन सत्तावत्त्वं भावत्वं तदभावोऽभावत्वमिति भावाभा
वयोर्लक्षणानुरोधेन च तस्य विशिष्टबुद्धिनियामकत्वरूपसंबंधताया आवश्यकत्वात्तदतिरिक्ते कज्ञानविषयतादिरू
पपरंपराणामेव संबंधताया निराकरणादित्त आह। सत्तावानिति। केचित्तु कपिसंयोगात्मकाभावस्य प्रतियोगिवैयधि
करण्याघटितव्यापकतानिवेशाकल्पेलक्षणघटकत्वं न संभवतीत्यतो तत्कल्पेपि दोषदानायाह सत्तावानिति। अथ प्रति
योगिवैयधिकरण्याघटितव्यापकत्वकल्पे साध्यवन्निष्ठत्वांशे स्वरूपसंबंधनिवेशावश्यकतया कपिसंयोगात्मकाभा
वस्य साध्यवृत्तिस्वरूपसंबंधेनासत्त्वाव्यापकत्वाघटकत्वासंभवेन लक्षणघटकत्वसंभवसेवान्यथा सत्ताभावीयप्रति ॥४१॥
योगितावच्छिन्नाभावस्यापि कालिकसंबंधेन साध्यवति सत्त्वात्तस्यापि लक्षणघटकत्वानुपपत्तिः॥ न च स्वप्रतियोगि
मत्तायह विरोधितानियामकसंबंधेन साध्यवद्वृत्तित्वं निविष्टमिसमभिप्रायेणेदमिति वाच्यं॥ एवं सति प्रतियोगिवैयधि

करण्याघटितव्यापकत्वकस्येपर्यवसितत्वात्मकाभावमादायदोषवारणाय यत्सामानाधिकरण्यघटकवृत्तौस्वरूपसंबंधनि
वेशावश्यकत्वमपहर्तुमना नास्थाने संबंधनिवेशप्रयुक्तगौरवोद्भावनस्यासंगतत्वापत्तेरितिचेन्न। साध्यवत्ताग्रहविरोधि
ता नियामकसंबंधेन साध्यवद्वृत्तित्वनिवेशाभिप्रायेणास्वरसस्य गौरवोद्भावनस्य च संगतेरित्याहुः। साध्यसामाना
धिकरण्यघटकवृत्तौ स्वरूपसंबंधावच्छिन्नत्वनिवेशे सत्ताभावमादाय व्याप्तिविरहेप्यात्मवृत्तित्वविशिष्टसत्ताभावमा
दाय व्याप्तिबोधिया। व्यभिचारविरोधीति। व्यभिचाराभावव्याप्यइत्यर्थः। इहहेतावुपाधिर्नेहहेतावुपाधिरितिव्यवहा
म रद्वयप्रदर्शनाद्व्याप्यत्वसंबंधस्यविशिष्टबुद्धिनियामकत्वेऽभावप्रतियोगितावच्छेदकत्वं च दर्शितं। अव्याप्यत्वस्येति। अव्या
प्यत्वं च स्वाभाववत्त्वं बहुत्वेनात्मत्वाभावाभाववत्सात्मन्यात्मनोऽवृत्तित्वेपिनक्षतिः। यावत्पदस्यासाधारणप्रयोजनंनास्ती
त्यभिप्रायेणात एवेति। ग्रंथमवतारयति। नन्विति। एतेन साध्यतावच्छेदकावच्छिन्नादिविशेषणस्यव्यावृत्तेः पश्चाद्वक्ष्यमा
णत्वेसाध्यादौ जगदीशानामुपरि वक्ष्यमाणं दूषणमेतन्मतेनिरवकाशं। स्वव्यापकत्वत्वमिति। अत्रस्वव्यापकत्वं स्वसमा नै
नाधिकरणप्रतियोग्यवृत्तिभेदप्रतियोगितानवच्छेदकत्वं भेदप्रतियोग्यवृत्तित्व। निवेशाद्व्यासज्यवृत्तिधर्मावच्छिन्नसा
ध्यके साध्याभावीयप्रतियोगितायाः प्रत्येकवृत्तितयातत्तोभयत्वावच्छिन्नप्रतियोगिताकभेदस्यसत्वेपि नासाध्यताव
च्छेदकव्यापकप्रतियोगितायाअप्रसिद्धिः। अतएवभूतत्वमूर्तत्वोभयत्वावच्छिन्नप्रतियोगितायाअपि साध्यतावच्छेदकव्या
पकत्वात्तन्निरूपकाभावस्य लक्षणघटकत्वनिर्वाहः। यद्यप्येतत्कल्पेस्वविशिष्टत्वनिवेशप्रयोजनाभावेन यावद्धेतुत्वधी

करणजन्यपरमाणौ केनापि संबंधेन भूतत्वमूर्तत्वोभयाभावासत्वान्नतादृशाभावस्य विवक्षणीयप्रतियोगिता सामाना
धिकरण्यमिति मितिनातिव्याप्तिस्तथापि नित्यानामपि मूर्तानां दिशु पार्थिवत्वमित्यभिमाने नेदमिति ध्येयं॥ अथ घटवान् भूत
॥४२॥ त्वमूर्तत्वोभयघटकभूतत्वं बहिरिंद्रियग्राह्यविशेषगुणरूपमेवेति न क्षतिः॥ व्यापकता घटकसंबंधेन प्रतियोगिसा
मानाधिकरण्यनिवेशानासंभवादिति॥ प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वस्य स्वस्वरूपसंबंधेनैव सत्वतादृशप्रति
योगिताकस्य वन्ह्याद्यभावस्य स्वरूपसंबंधेन प्रतियोगिसामानाधिकरण्याभावात्संयोगेन वन्ह्यादिसाध्यकेधूमादिहेता
वव्याप्तिरिति भावः॥ पर्वतभिन्नभेदस्येति॥ अथ प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसामानाधिकरण्यानिवे
शोऽसंभवः कुतो नोक्तः॥ न च प्रमेयसाध्यके पक्षभिन्नभेदस्य साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वविरहेण घटत्वप
टत्वोभयाभ्यां प्रमेयसामान्याभावमादाय लक्षणसमन्वयः॥ संभवतीति वाच्यं॥ तत्रापि हेत्वधिकरणवृत्तितानवच्छेदकसं
बंधावच्छिन्नाभावस्य तेन संबंधेन हेत्वधिकरणे प्रतियोगिसामानाधिकरण्यासंभवात्॥ अत्र केचित्॥ प्रतियोगितायां
तादात्म्यसंबंधावच्छिन्नत्वदाने प्रमेयसाध्यके लक्षणगमनान्नासंभवोऽभिहितः॥ वस्तुतस्तु विषयितासंबंधस्य वृत्तिनि
यामकत्वाऽभावप्रतियोगितानवच्छेदकत्वे प्रमेयसाध्यकभूतत्वादिहेतुके लक्षणसमन्वयः संभवति तत्र विषयिता
तिरिक्तसंबंधानां हेत्वधिकरणवृत्तितावच्छेदकत्वात्॥ वक्ष्यमाणस्वच्छंदं तरेति॥ घटत्वाभाववान् प्रमेयत्वादित्यादाविसे
र्थः॥ अतिव्याप्तिरिति॥ पूर्वलक्षणघटकत्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायेत्यादिः॥ नास्माकं दो ॥४२॥

पद्वृत्ति॥ पूर्वमते ऽपि सत्त्वादिवृत्तिभावः॥ यद्वा यादृशप्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरण
धर्मावच्छिन्नाभावभिन्नत्वोभयाभावस्तादृशप्रतियोगिताश्रयसामानाधिकरण्यस्यैव प्रतियोगिसामानाधिकरण्यमित्यनेन
स्वमते विवक्षणीयत्वात् पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वावच्छिन्नप्रतियोगितायाश्च तादृशत्वान्नास्माकं मते ऽतिव्याप्तिरि
त्यभिप्रायः॥ भावप्रतियोगीसामानाधिकरण्यमिति॥ साध्यतावच्छेदकसंबंधेनेति॥ क्वचित्पाठः॥ स प्रामादिकः॥ व्य
भिचारिणी सर्वेषामेवाभावानां पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायातिव्या
प्तिवारणाय भावरूपप्रतियोगिनीवेशामार्थक्येऽपि साध्यतावच्छेदकसंबंधेनेतस्य व्यर्थत्वात्॥ न च तदर्थनिवेशो व्यभिचा
रिणी महाकालभिन्नं कालत्वादिसाध्यके सर्वेषामभावानां कालिकसंबंधेन प्रतियोगिसमानाधिकरणत्वाद्गगनादीनां
कालवृत्तित्वस्वीकारात् गगनाभावस्यापि तथात्वात् गगनादीनां कालावृत्तित्वेऽपीश्वरज्ञानभिन्नं गुणत्वादिसाध्यके सर्वेषा
मेवाभावानां विषयितासंबंधेन प्रतियोगिसमानाधिकरणत्वात् तन्निवेशोऽवश्यक इति वाच्यं॥ भावात्मकानां महा
कालभेदे ईश्वरज्ञानभेदाभावानां भावरूपप्रतियोगिसामानाधिकरण्याभावात्॥ न च तादृशाभावानां महाकालेश्व
रज्ञानभिन्नाभावानां लाघवान्महाकालत्वेश्वरज्ञानत्वादिरूपतास्वीकारात् अप्रसिध्यसेवतेषां भावः प्रतियोगीति वा
च्यं॥ तथापि सर्वत्र व्यभिचारिण्येतद्रूपत्वमभावस्य यावदन्तर्गतस्य भावरूपप्रतियोग्यप्रसिध्यैवातिव्याप्तिवार

व्यामत्व

णस्य सुकरत्वात् ॥ यत्किंचिद्रूपावच्छिन्नसाध्यवत्ता निवेशे च सत्ताद्यानित्ति ॥ नन्वेवं वह्निमान्धूमादित्यादौ महानसीयवह्नित्वाव
च्छिन्नव्यापकतावच्छेदकप्रतियोगिताकमहानसीयवह्न्यभावमादायाव्याप्तिसंभवे सत्तासाध्यकानुधावनं निर्बीजमिति चे
॥४३॥ महानसीय दके चिन्न ॥ यत्किंचिद्रूपे साध्यतावच्छेदकव्यापकत्वनिवेशेनैव वह्न्यभावस्योक्तस्थले लक्षणघटकत्वमिति तत्पर्यन्तानु
धावनमिति साहु ॥ वस्तुतस्तु साध्यतावच्छेदकावच्छिन्नत्वनिवेशस्य विशिष्टसत्तासाध्यकजातिहेतौ व्याप्तेः पूर्वमुक्तत्वा
त् सत्तायां जातेरूपस्थितत्वात्तत्राव्याप्तिरुक्तेति ध्येयं ॥ न तु तथाविधविशेष्यतात्वेनेति विशेषरूपेण संसर्गतास्वी
कारे व्यभिचारिणी साध्यवदनुयोगिकस्वरूपसंबंधस्यापि व्यापकताघटकतया तेन संबंधेन वाच्यत्वाभावस्य अभि
चारः निरूपकाधिकरणे प्रतियोगिसामानाधिकरण्याभावाद्भावे भावत्वं व्यर्थं स्यादिति भावः ॥ ननु संबंधसामान्येन
धूमप्रतिधर्मान्यचत्समवेतं तद्धन्यधर्मे यस्यापि स्वरूपसंबंधेन व्यापकतया तदभावस्य संयोगसंबंधावच्छिन्नधूम
निष्ठव्याप्यतानिरूपीतस्वप्रतियोगिसावच्छिन्नव्यापकताघटकसंबंधसामान्यान्तर्गतसंयोगेनायोगोलकादौ प्रतियो
गिसामानाधिकरण्याभावान्नाव्याप्तिरिति चेन्न ॥ स्वरूपसंबंधावच्छिन्नप्रतियोगिताकतादृशप्रमेयाभावस्य सर्ववृ
वाच्यत्वाभावादिरूपतादृशाप्रमेयसत्त्वेनाप्रसिद्धतया संयोगादिसंबंधावच्छिन्नाभावस्य च धूमत्वस्यैवावच्छेदकत्वसंभवे ॥४३॥
नाप्रसिद्धेः ॥ यत्विसादिविशिष्टसत्तासाध्यके व्यभिचारिणीगुणान्यत्वद्रव्यत्वाभावप्रतियोगिनां साध्यवद्गुणादिनि

ष्टभेदप्रतियोगितावच्छेदकतयानन्तेषां लक्षणघटकता संभवतीति सत्ताद्यभावमादायातिव्याप्तिरतो साध्यतावच्छेद
कावच्छिन्नेति। एतन्मते तदपि निवेशनलाघवादिति॥ ननु भेदत्वस्य तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वरूपस्य निवे
शान्न लाघवावकाशः॥ न च भेदत्वमखंडोपाधिरिति मते नेदमिति वाच्यं॥ एवं सत्यपि वन्हिमान्धूमादित्यादौ साध्यव्या
पकत्वेनाभिमतद्रव्यत्ववाच्यत्वादेरपि साध्यवन्निष्ठो योऽत्यंताभावादिस्तस्यापि स्वावच्छिन्नभिन्नभेदस्वरूपत्वाद्भेदत्वेन
तत्प्रतियोगितावच्छेदकत्वेन साध्यव्यापकस्यैवाप्रसिद्धेः साध्यवन्निष्ठाभावीयायास्तादात्म्यसंबंधावच्छिन्नप्रतियोगि
ता तदनवच्छेदकत्वरूपस्यैव साध्यव्यापकत्वस्य निवेशनीयत्वात्॥ अत्र केचित् भेदत्वमनुयोगिताविशेष एवं च साध्यवद्वृत्ति
तावच्छेदकतादृशानुयोगितानिरूपकतानवच्छेदकत्वरूपव्यापकत्वस्यैव निवेश्यत्वान्न साध्यव्यापकाप्रसिद्धिः॥ न चैवं ला
घवानवकाशो वन्ह्याद्यभावीयप्रतियोगितावच्छिन्नाभावे विद्यमानो यो घटत्वाभावादिभेदस्तस्याधिकरणस्वरूपानतिरिक्तत
या साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्य वन्ह्याद्यभावप्रतियोगितायां दुर्घटत्वाद्व्यापकताघटकसंबंधावच्छिन्ना
या साध्यवद्वृत्तितावच्छेदकाभावत्वनिरूपकतातदनवच्छेदकत्वपर्यंतनिवेशावश्यकत्वात्॥ अथैवमपि व्यधिकरणध
र्मावच्छिन्नावच्छेदकताकभेदमादाय व्यापकताप्रसिद्धिवारणाय स्वव्यधिकरणधर्मानवच्छिन्नावच्छेदकताया एव निवेशनी
यतया न लाघवावकाश इति चेन्न॥ तन्निवेशस्य सामानाधिकरण्येनानवच्छेदकत्वनिवेशेन समानत्वात्॥ व्यधिक

रणधर्मावच्छिन्नावच्छेदकताकासंताभावाभ्युपगमएतन्मतेप्यवच्छेदकतायांस्वव्यधिकरणधर्मानवच्छिन्नत्वनिवेशाव
श्यकत्वाच्च॥ विशिष्टघटत्वपर्याप्तितयेति॥ घटत्वघटोभयत्वावच्छेदेनपर्याप्तितयेसर्थः॥ शुद्धघटकस्येति॥ घटत्वाव
॥४७॥ च्छेदेनतत्पर्याप्त्यनधिकरणत्वादित्यर्थः॥ लक्षणघटकत्वापातादिति॥ अथपर्वतत्वात्मकाभावस्यलक्षणघटकत्वे
पिनक्षतिस्तस्यव्यापकताघटकस्वरूपसंबंधेनपर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणत्वा
दिति॥ चेदत्र केचित्॥ घटत्वाभाववान्प्रमेयत्वादित्यादौ घटत्वात्मकाभावस्यतादृशप्रतियोगिसामानाधिकरण्यमादा
यातिव्याप्तेर्वारणायप्रतियोगिसामानाधिकरण्यघटकप्रतियोगितायांव्यापकवृत्तितानिरूपकत्वस्य यादृशप्रतियो
गिताकाभावेस्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववत्तादृशत्वरूपस्य
स्वाभावत्वानवच्छिन्नत्वस्य वा निवेशनीयत्वात्॥ नचतत्र घटत्वाभावप्रकारकप्रमाभावमादायातिव्याप्तिवारणसंभव
त्तिजन्यप्रमायाः प्रतियोगिवैय्यधिकरण्याघटितव्यापकत्वासंभवात्प्रमासामान्याभावस्य च व्यधिकरणधर्मावच्छि
न्नप्रतियोगिताकस्यैवप्रसिद्धेः तस्यप्रतियोगिसामानाधिकरण्यावश्यकत्वात्॥ नचतत्र घट[illegible]भिन्नस्यतादा
त्म्यसंबंधेनसाध्यव्यापकतयातद्भेदस्य व्यापकताघटकतादात्म्यसंबंधेनघटेप्रतियोगिसामानाधिकरण्यविरहेण
नातिव्याप्तिरितिवाच्यं॥ प्रतियोगितायाः प्रतियोगिस्वरूपत्वे घटभिन्नभेदीयप्रतियोगिताया व्यापकतानवच्छेदक

त्वादि साहुः॥ अत्रेदं बोध्यं॥ प्रतियोगितायाः प्रतियोगिस्वरूपत्वे गवाभावमादाय लक्षणद्वयसाधारण्यावच्छेत्व
धिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यनिवेशव्यावृत्तिदानासंगतिस्तस्य लक्षणघटकत्वासंभवाद्धूमा
भावस्य लक्षणघटकत्वाभावेन जलत्वादिवृत्तीसादिग्रंथानुपपत्तिरिति चेत् प्रतियोगितायाः प्रतियोगिस्वरूपत्वं नोऽनु
मतं ग्रंथकर्तुरिति घटभिन्नाभेदस्याप्युक्तस्थले लक्षणघटकत्वं दुर्वारं॥ वस्तुतस्तु वक्ष्यमाणरीत्या व्यापकतावच्छेदक
प्रतियोगितायां भेदानवच्छिन्नत्वविशेषणावश्यकतया न घटभिन्नाभेदस्य लक्षणघटकत्वमित्यवधेयं॥ हेतुसामा
नाधिकरण्यघटकाभावीयप्रवृत्तावपीति॥ अथैवमपि घटत्वेन पर्वतत्वाभावाभावमादायाव्याप्तिर्दुर्वारैवानवक्षमनीयता
भावानामैक्यमते तस्य घटत्वेन वह्न्यधिकरणत्वाभाववद्भिन्नत्वे याच वह्न्यधिकरणत्वरूपप्रतियोगिसामानाधिकरण्यसंभवसत्वे
त्ति वाच्यं॥ तन्मते धूमवान्वह्नेरित्यादौ वक्ष्यमाणातिव्याप्तिवारणाय यत्र यत्प्रतियोगिताकाभावावृत्तिनिवेशस्यावश्यकत्वात्॥
अत्र केचित्॥ अभावप्रतियोगिकत्वस्याप्यभाववद्भिन्नत्वस्यैव तादृशविशेषणेन विवक्षितत्वाद्घटत्वादिना पर्वतत्वाभावाभावस्या
तयात्वान्न दोषः॥ न चैवं सति पर्वतावृत्तित्वावच्छिन्नाभावस्य लाघवेन पर्वतत्वात्मकस्य साध्यवत्ति दैशिकविशेषणतयावृ
त्तित्वविरहेण लक्षणघटकत्वापत्तिरिति वाच्यं॥ अभावमात्रप्रतियोगिकत्वस्य नरर्थत्वान्निरुक्ताभावस्य पर्वतावृत्तिपर्वतत्वा
भावादिप्रतियोगिकत्वात्॥ न च तथापि पर्वतावृत्तिजातित्वावच्छिन्नाभावस्य लाघवेन पर्वतत्वात्मकस्य लक्षणघटकत्वं
दुर्वारमिति वाच्यं॥ अभावाभिन्नत्वमित्यनेन साध्यवद्वृत्तियेभावास्तत्प्रतियोगिप्रतियोगिकान्यत्वस्य विवक्षणान्न कोऽपि दो

षड्साहुः। परे तु पर्वतत्वाभाववत्तावच्छिन्नप्रतियोगितायाः सामान्याभावीयप्रतियोगितायाः प्रतियोगितावच्छेदकधर्म
॥४५॥ स्वरूपत्वमिति जगदीशोक्तरीत्या पर्वतत्वाभाववत्त्वस्वरूपत्वात्तदवच्छिन्नाभाव एव पर्वतत्वस्वरूपो घटत्वेन पर्वतत्वाभाववाभावीय
प्रतियोगिताया अतिरिक्ततया तदवच्छिन्नाभावेन पर्वतत्वस्वरूपत्वं तत्र स्वदेशीकविशेषणतया साध्यवद्वृत्तितान्नताद
शप्रतियोगिताया व्यापकतावच्छेदकत्वमित्यनितादृशाभावस्य लक्षणघटकत्वमेव नास्तीति पूर्वपक्ष एवायं नावतरतीति निवदन्ति
॥ सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्येति प्रतियोगितासमानाधिकरणत्वावच्छेदकतावच्छिन्नपर्याप्तिशून्यत्व
स्येत्यर्थस्तेन वह्न्यादिनिष्ठप्रतियोगितातद्वृत्तिप्रतियोगिताभ्यां घटाभावमादाय न वह्न्यादिनिष्ठप्रतियोगितानां व्यापक
तावच्छेदकतानुपपत्तिर्वह्निनिष्ठप्रतियोगितेन वह्नितदन्योभयाभावीयप्रतियोगितावच्छेदकत्वं तु तादृशोभयत्वानामभावे
नैव पर्याप्तं केचित्तु समानाधिकरणधर्मावच्छिन्नाभावीयप्रतियोगिताप्रतियोगितावच्छेदकरूपाप्यधिकरणधर्मावच्छिन्न
प्रतियोगिताचातिरिक्ता एवं चात्र सामानाधिकरण्यप्रभेदस्तथा च तादृशप्रतियोगिताभेदतदवच्छेदकत्वोभयाभावः सामा
नाधिकरण्येनानवच्छेदकत्वमित्यत्र न कोपि दोषः इत्यवदन्ति ॥ गौरवादित्यनतुप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्व
घटकावच्छिन्नत्वाधिकरणत्वादौ तत्तत्संबंधावच्छिन्नत्वस्य यादृशयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं साध्य
वन्निष्ठतादृशतादृशप्रतियोगितावच्छेदकताभावकूटस्य तन्मते निवेशनीयतया नेतन्मते गौरवमिति चेन्न ॥ तन्मते साध्यवन्नि
ष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकताभावस्यानुगतस्यैव निवेशनीयत्वात् ॥ वह्निसंयोगादीति। यद्यप्यत्र तत्तत्सं ॥४५॥

योगाभावः सर्वत्रैव लक्षणघटक इत्यसंभव एव वक्तुमुचितस्तथापि साध्यसमानाधिकरणनिष्ठत्वेन व्यापकतावच्छेदकप्रति
योगिताविशेषणत्वे तद्रूपवानेतद्दशादिसाधारलक्षणसमन्वयस्तादृशप्रतियोगिताकाभावस्य हेतुमति प्रतियोगि
सामानाधिकरण्यनियमादित्यभिप्रायः॥ साध्यतावच्छेदकसंबंधेन प्रतियोग्यधिकरणत्वनिवेशे त्वाहे कालः सर्वदानिति
सामान्यामात्रवृत्तीतिभावानां स्वरूपसंबंधोऽभावानां दैशिकविशेषणतासंबंधस्तु विलक्षण एवं च वाच्यत्वसाध्यके घट
त्वादीनां वाच्यत्वाभावमादाय लक्षणसमन्वय इति मात्रपदं तथा च जासभावसाध्यके व्यभिचारिणी दैशिकविशेषणताया
व्यापकताघटकत्वाभावे घटत्वादिनावाच्यत्वाभावमादायातिव्याप्तिसत्त्वेऽपि साध्यवत्त्वप्रकारकप्रमाभावमादायातिव्या
प्तिवारणं भवतीति प्रघट्टकार्थः॥ प्रतियोग्यनधिकरणसाध्यवतोऽप्रसिद्धिरिति॥ अथ घटादिभिन्नत्वेन घटाद्यभावीयप्रति
योगिताया घटादिमात्रवृत्तितायाऽन्यत्रोक्तत्वात् तादृशपदेन तादृशप्रतियोगितामादाय तदाश्रयानधिकरणत्वं साध्यव
तोऽस्त्येवेति कथमप्रसिद्ध्यभिधानं। घटभिन्नत्वेन घटगगनान्यतराभावीयप्रतियोगितायास्तादृशप्रतियोगिताभिन्नत्वे
बाधकाभावात्तादृशप्रतियोगिताया घटमात्रवृत्तित्वासंभवस्तेन तादृशं क्व तथाप्यप्रसिद्धेरभावात्॥ अत्र केचित्॥ अप्रसिद्धिरि
सस्य यादृशप्रतियोगिताश्रयानधिकरणं साध्यवत्तादृशसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताया अप्रसिद्धिस्तथो
चासंभवो घटभिन्नत्वेन घटाभावस्यापि लक्षणघटकत्वात्तस्य यावद्धेत्वधिकरणेषु प्रतियोगिसामानाधिकरण्याभावात्॥
न च समनियताभावैक्यमतेनैतस्य घटत्वादिनावह्न्यभावाभिन्नत्वतया वह्निरूपप्रतियोगिसामानाधिकरण्यसंभव इति वाच्यं॥

समनीयताभावैक्यमतेऽन्तिव्याप्तिवारणाय यद्यत्प्रतियोगिताकाऽसादिविवक्षणावश्यकत्वादिसाहुः॥ अपरेतु या
॥४६॥ दृशायादृशप्रतियोगिताश्रयानधिकरणं साध्यवत्तादृशानादृशप्रतियोगितावच्छेदकत्वाभावकूटनिवेशाद्घटत्वाद्यवच्छि
न्नप्रतियोगितावच्छेदकत्वाभावनिवेशे गौरवात्प्रतियोगित्वनिष्ठायाः समानाधिकरणतयावच्छेदकतानिरूपकप्रतियो
गितावद्भिन्नप्रतियोगितैव यादृशप्रतियोगितेसनेनोपादेयात्पाच तादृशप्रतियोगिताया अप्रसिद्धिर्घटभिन्नत्वाव
च्छिन्नप्रतियोगिताया अप्युपादानासंभवादिति वदंति। ननु समनीयताभावैक्यमते प्रतियोगितावच्छेदकविशिष्टत्वस्य
व्याप्तिरसंगतैव तन्मते गोत्वाभाववादीनां गोत्वत्वेन प्रमेयसामान्याभावाभिन्नतया सर्वत्र प्रमेयरूपप्रतियोगिसामाना
धिकरण्यसंभवात्साध्यतावच्छेदकसाद्विशेषणस्यैव वैयर्थ्यात्॥ न च तन्नैक्यमताभिप्रायेणैव तद्विशेषणमिति वा
च्यं। तदनैक्यमताभिप्रायेण प्रविष्टसाध्यतावच्छेदकसाद्दित्वप्रविष्टप्रतियोगितावच्छेदकविशिष्टत्वव्याप्तेस्तदैक्य
मताभिप्रायेण कथनस्यायुक्तत्वादिति चेन्न॥ समनीयताभावैक्यमतेपि साध्यतावच्छेदकसाद्दिविशेषणव्याप्तेः सं
भवति कथमिति चेत् तन्मतेतु स्वमुक्त्याऽन्तिव्याप्तिवारणाय यद्यत्प्रतियोगिताका यावंतोऽभावाः स्वावच्छेदकसंबंधेन
प्रतियोगिसमानाधिकरणा इति विवक्षाया आवश्यकत्वात्॥ सत्तावान् जातेरित्यादौ संयोगादिना घटाभावस्य तादृश
व यावदंतर्गतस्य यॉद्रेत्वधिकरणांतःपातिगुणादौ संयोगेन प्रतियोगिसामानाधिकरण्याभावात्साध्यतावच्छेदकेसा
दिविशेषणस्यावश्यकत्वादि सर्वेहि॥ फलतः साध्यवदित्ति॥ वन्हिमहानसीयवन्ह्यभावीयप्रतियोगितावच्छिन्नस्यसाध्य

वत्संबद्धत्वसामान्याभावविरहेण तादृशाभावीयप्रतियोगितायाः व्यापकतायाः व्यापकतावच्छेदकत्वापत्तिवारणाय यत्किंचिदिति
नञ्चत्र सामान्यपदं व्यर्थं । न च तदनुपादाने वह्निसाध्यके वह्निसामान्याभावीयप्रतियोगितावच्छिन्नयत्किंचिन्महानसीयवह्नेः सा
ध्यवद्यत्किंचिद्वृत्तितासंबद्धत्वेन वह्निसामान्याभावीयप्रतियोगितायाः व्यापकतावच्छेदकत्वानुपपत्तेस्तदावश्यकमिति वाच्यं ।
तादृशप्रतियोगितायाः व्यापकतानवच्छेदकत्वेपि द्रव्यत्वाभावमादायैव लक्षणसमन्वयसंभवात् । अत्र केचित् । सामान्यप
दानुपादाने वह्न्यभावद्रव्याद्यभावीयानेकप्रतियोगिताभेदकूटनिवेशापत्ते गौरवात् कूटसंकोचार्थं सामान्यपदोपादा
नात् । न च तथासति तादृशानेकाभाववान् लक्षणघटकतापत्तेस्तेषां प्रसक्तं प्रतियोगिसामानाधिकरण्यनिवेशे गौरव
मिति वाच्यं । अनुयोगिन्येकमात्रवृत्तित्वस्यापि निवेशादिसाधुस्तदसत् । तथासति गवाभावस्येति यंथासंगते जला
दिवृत्तित्वविशिष्टसादिग्रंथासंगतेश्च दुर्वारत्वात् । तादृशग्रंथानुरोधेनैव सामान्यपदोपादानमित्यस्यैव वक्तुं शक्यत्वा
च्च ॥ वस्तुतस्तु ॥ वाच्यं ज्ञेयत्वादिसाध्ये सत्ताभावीयप्रतियोगितायाः अविसमवायेन व्यापकतावच्छेदकत्वापत्तिस्तत्र
तादृशप्रतियोगितायां स्वपदेनोपादानेन तदवच्छिन्नस्य साध्यवद्द्रव्यगुणकर्मरूपव्यक्तिसंबद्धत्वनियमात् समवाये
न सामान्यादिसंबद्धत्वाप्रसिद्धेश्च घटाद्यभावीयप्रतियोगितायाः एव स्वपदेनोपादेयत्वात् तदन्यतमस्य तादृशप्रतियो
गितायामक्षतत्वात् न सत्ताभावस्यापि लक्षणघटकतया न स्य व्यापकता घटसमवायेन यावद्वृत्त्यधिकरणसामान्यादि

तर्भावेण प्रतियोगिसामानाधिकरण्याभावादव्याप्तेर्वारणाय व्यापकताघटकसंबंधावच्छिन्नत्वावच्छिन्नाधिकरणतासा
॥४८॥ मान्ये साध्यवद्यत्किंचिद्व्यक्तित्वसंबद्धत्वमेव निवेशनीयं तत्र च सामान्यपदानुपादानेऽधिकरणतायाअधिकरणस्वरू
पत्वमते वह्न्यादिसाध्यके व्यापकतावच्छेदकप्रतियोगितायाअप्रसिध्यापत्तेर्द्रव्यत्वाभावीयप्रतियोगितावच्छिन्ना
धिकरणतायो महानसादिरूपायाः साध्यवद्यत्किंचित्व्यक्तिसंबद्धत्वादतः सामान्यपदोपादानं॥ अथैवमपि द्रव्य
त्वाभावीयप्रतियोगितायाः संयोगेन व्यापकतावच्छेदकत्वापत्तिः संयोगसंबंधावच्छिन्नतदवच्छिन्नतदवच्छिन्नाधि
करणताप्रसिध्यानस्याः स्वपदेनोपादानासंभवात्तथासति तादृशप्रतियोगिताकाभावस्य यावद्वृत्त्यधिकरणगुणा
दौ तादृशसंयोगेन प्रतियोगिसामानाधिकरण्याभावात्सत्तावान् जातेरित्यादावव्याप्तिर्दुर्वारैवेति वाच्यं॥ यादृश
संबंधावच्छिन्नाधिकरणतासामान्ये यादृशप्रतियोगितावच्छिन्नानिरूपकताकत्वं साध्यवद्यत्किंचिद्व्यक्तिवृत्तित्वो
भयाभाववत्त्वं तादृशान्यत्वमेव तेन संबंधेन व्यापकतावच्छेदकत्वमित्यस्य विवक्षणादिति दिक्॥ आत्ममहाकालान्यतरत्वा
दित्यादिविषयतासंबंधघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्यात्मत्वप्रकारकयत्किंचित्प्रमाभावस्य प्रतियोगि
समानकालीनत्वंऽकालेप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरिति हेतुकोटौ महाकालं कारणत्वादिति॥ आ
दिपदेन परमार्थसत्त्वपरिग्रहस्तस्य कालसंबंधरूपत्वात्॥ अवच्छिन्नत्वप्रवादानुरोधेनाह॥ निसत्ति॥ अत्रापि कालान्यत्व

प्रकारकयत्किंचित्प्रमाभावस्य ज्ञानभेदप्रकारकयत्किंचित्प्रमाभावस्य च प्रतियोग्यसमानकालीनेत्युक्तावपि प्रतियोग्यवि
षयके ज्ञाने च प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरतो महतीत्यवरेति चोपात्तमित्यध्येयं ॥ इदं निसज्ञानेनिसत्त्वे
सति सविषयकत्वादिति ॥ अथ निसज्ञानत्वाभावीयप्रतियोगितायां विषयितासंबंधघटितव्यापकतावच्छेदकत्वं न संभव
ति साध्यवति निसज्ञाने सर्वस्यैव विषयितासंबंधेन सत्त्वात्तेन संबंधेन स्वप्रतियोग्यनधिकरणसाध्यवतोऽप्रसिद्धत्वात् ॥ वि
षयितासंबंधेन साध्यवह्निसज्ञानासंबद्धस्य विशिष्टसामान्यरूपप्रतियोगितायाः अप्रसिद्धत्वाच्च ॥ एतेन ज्ञानेच्छयोः
समानविषयकत्वनियमात् गोपदजन्यबोधविषयत्वविशिष्टतीरत्वावच्छिन्नाधिकरणताज्ञानेन स्वीकृतं तु शक्यनेन तथा
सति तीरे गंगापदशक्तिरेव स्यादेवं निसज्ञानान्यत्वविशिष्टघटत्वावच्छिन्नाधिकरणतापीति स्वीकारेऽपि न निस्तारः ॥ सा
ध्यवद्यत्किंचिदसादिपरिष्कारस्यावश्यकत्वात्तत्र च घटत्वाद्यनंतभेदनिवेशे गौरवेण लाघवेन प्रतियोगितायाः
वस्वपदेनोपादेयतया तादृशनिसज्ञानाभावीयप्रतियोगितायां निसज्ञानान्यत्वविशिष्टघटाभावीयप्रतियोगितायाश्च
विरोधितीरभूत घटमात्रनिष्ठतया तदवच्छिन्नस्य निसज्ञानासंबद्धत्वविरहात् ॥ अन्ये केचित्तु प्रतियोगिवैयधिक
रण्याघटितव्यापकत्वाभिप्रायकमिदं तथा च साध्यवह्निष्ठो यो व्यधिकरणधर्मेण विषयितया प्रतियोगित्वाव
च्छिन्नाभाववत्त्वप्रतियोगितायां सामानाधिकरण्येनानवच्छेदकत्वरूपं विषयितया साध्यव्यापकतावच्छेदकत्वं निस

ज्ञानत्वाभावीयप्रतियोगितायामसत्तां न च तादृशप्रतियोगितायां सामानाधिकरण्येनावच्छेदकत्वाप्रसिद्धिः शंक्या सामा
॥५८॥ नाधिकरण्यावच्छेदकत्वोभयाभावस्यैव निविष्टत्वात् प्रतियोगिवैयधिकरण्यघटितव्यापकत्वकल्पे तु निसज्ञानान्य
त्वस्वनिष्ठतद्व्यक्तित्वोभयविषयकजन्यज्ञानं पक्षस्तन्निष्ठतद्व्यक्तित्वं साध्यं तद्व्यक्तिनिसज्ञानान्यतरत्वं हेतुस्तत्र तत्
व्यक्तित्वनिसज्ञानान्यत्वाभावप्रतियोगिनोर्विषयितासंबंधेन व्यापकतया तेन संबंधेन तादृशाभावयोः प्रतियोगि
समानाधिकरणत्वादिति व्याप्तिवारणाय येन येनेति वीप्साजववृपकीसाकुः। एवस्तत्वस्कनिसज्ञानमिसत्त्रानिसत्वविशि
ष्टं ज्ञानत्वमेव साध्यत्वेन विवक्षितं तद्विशिष्टं च स्वरूपत्वाभावविशिष्टघटादिविषयकसर्वविषयकज्ञानत्ववत्वान्यतरसम
वायोभयसंबंधघटितसामानाधिकरण्यसंबंधेन तथा च साध्यवद्घटादिविषयकसर्वविषयकज्ञाननिष्ठो यो घटाभावी
यप्रतियोगित्वावच्छिन्नस्वविषयितासंबंधावच्छिन्नप्रतियोगिताकोऽभावस्तत्प्रतियोगितानवच्छेदकत्वस्य निसज्ञान
त्वाभावीयप्रतियोगितायामसत्त्वान्न काचिदपि क्षतिरिति सुधियो विभावयंतु। समनियताभावैक्यमते घटत्वादिना
द्रव्यत्वाभावस्य घटत्वादिनावच्छिन्नाभावाभिन्नतया साध्यतावच्छेदकसंयोगसंबंधेन वह्निरूपप्रतियोगिसामानाधिकर
ण्यसंभवमाशंक्याह। घटवृत्तित्वविशिष्टद्रव्यत्वत्वादिनेति। हेतुसामानाधिकरण्यसंपत्तये घटवृत्तित्वविशिष्टेति।
उभयाभावघटितेति। स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वहेत्वधिकरणयत्किंचिद्व्यक्त्यनुयोगिकत्वसामान्यो

व भयाभावत्साध्यतावच्छेदकसंबंधसामान्यकत्वरूपेत्यर्थः। अव्याप्तेरिति। नन्वभावपदस्य पूर्वोक्ताभावभिन्नार्थकत्वान्न घटत्वाभावसाध्यकेऽव्या
प्तिरिति चेन्न। तथासति कपिसंयोगात्मकाभावमादायस्य विशिष्टत्वविशेषणमादायसंगतेः। ननु सत्तावान्जातेरित्यादौ तव्याप्तिः
संभवतीत्यत आह। एवमिति। उक्तेति। व्याप्तेरिति। घटत्वाभाववान्मेयत्वादित्यादावित्यर्थः। अभावेऽभावभिन्नस्य प्रतियोगिनीभाव
त्वस्य च निवेशो लाह। आत्मत्वसाध्यकेति। बाधबुद्धिप्रतिबंधकत्वाया इति। तद्वत्ताज्ञाननिष्ठतत्संबंधावच्छिन्नतद्धर्मावच्छिन्नप्रका
रताशालिज्ञानत्वावच्छिन्नबध्यतानिरूपिततदभाववत्ताज्ञाननिष्ठप्रतिबंधकताया इत्यर्थः। संबंधविशेषनियंत्रितत्वानुरो
धादिति। तद्धर्मावच्छिन्नप्रतियोगितांशे तत्संबंधावच्छिन्नत्वावगाहित्वघटितधर्मावच्छिन्नानुरोधादित्यर्थः। अन्यथा। तेन संबं
धेन तद्वत्ताज्ञानं प्रतिकेवलतदभावावगाहिनिश्चयस्य प्रतिबंधकत्वाविरोधित्वप्रसंगादिति। अत्र वस्तुगत्या घटसंयोगवि
रोधियोऽभावस्तद्वत्तानुयोगितासंबंधावच्छिन्नप्रतियोगिप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारकज्ञानत्वेन प्रतिबंधकत्वान्न दो
षः इति नाशंकनीयं तादृशानुयोगितात्वेनान्यानुयोगितावगाहिज्ञानस्याप्रतिबंधकत्वप्रसंगात्। उपनीतकांचनमयत्वादिनावन्ह्य
नुमितीति। कांचनमयत्वज्ञानरूपसन्निकर्षसहकारेण वन्हित्वावच्छिन्नव्याप्यवत्तापरामर्शजन्यकांचनमयत्वप्रकारेण वन्ह्यनुमिती
त्यर्थः। प्रकारांतरानुसरणेति। हेत्वधिकरणवृत्तितावच्छेदकस्वप्रतियोगितावच्छेदकत्वायेपेसंबंधांशप्रवेशे तेन संबंधेन प्रतियोगीसा
मानाधिकरण्ये सतीति तेन संबंधेन प्रतियोगीसामानाधिकरण्यमिति निवेशानुसरणे इत्यर्थः। अथ यावत्त्वमनुपादाय साध्यताव
च्छेदकव्यापकप्रतियोगिताकस्येसेच पाठस्तदुत्तरं तदुपादाय वा साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशाइति पाठः। प्रमा

दिक एवतत्त्वाहि साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावनिवेशात्कल्पे घटत्वादिना रूपसामान्याभावाभावस्यापि ध्वंस
॥४९॥ ण घटकतयातस्य प्रतियोगिसामानाधिकरण्याभावान्नाव्याप्तिः ॥ न च तस्यापि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगि
सामानाधिकरण्यसंभवात् भवत्येवाव्याप्तिरिति वाच्यं ॥ घटत्वाभाववान् मेयत्वादित्यादावव्याप्तिवारणाय प्रतियोगिसामा
नाधिकरण्यघटकप्रतियोगितायां निरुक्तव्याप्यवृत्तितानिरूपकत्वस्य निवेशनीयत्वात् ॥ ध्वंसप्रागभावरूपप्रतियोगि
सामानाधिकरणस्यैवोक्तत्वाच्च ॥ न च समनीयताभावे च मते घटत्वादिरूपाभावाभावस्य घटत्वादिनावावाप्युत्वाभावाभावाति
न्नेतयावाप्युत्वाभावरूपप्रतियोगिसामानाधिकरण्यमस्त्येवेति वाच्यं ॥ न लक्ष्ये यच्च दिसा दिसाद्विविक्षाया वक्तुमुचितत्वादेवं दिति
त्वादन्यथाव्यभिचारादिसामान्यएवाव्याप्तेरिति ॥ नन्वेवमपि रूपसामान्याभावे साध्ये इति ग्रंथोऽत्तएवेति ग्रंथोत्तरमेवलेखनीय
इति संदर्भोऽस्तु हि दुर्वारैवेति चेदत्र केचित् ॥ उक्तरीत्या ग्रंथे यावत्त्वविशेषणस्य साध्यतावच्छेदकेसादिविशेषणनि
एतेने वहितयातव्यावृत्तिमदर्शकग्रंथोऽवश्यकएवमप्ययमात्मा ज्ञानादिसादावव्याप्तिवारणायैवसादिग्रंथस्तत्रमनोन्यत्वाभावस्य परंपरा
संबंधे प्रतियोगिसामानाधिकरण्यसंभवान्नोक्ताव्याप्तिरस्तु दूर इति नाकायामेव इदं अंतरे पीतिलिखित्वाप्रकृतं समाप्य रूपादीयादि
नोपेक्षा बीज प्रदर्शननिमित्तिनसंदर्भोऽस्तु हि इति वदंति ॥ रूपात्मकाभावस्य ध्वंसप्रागभावरूपप्रतियोगीति ॥ भावस्य प्रागभावध्वंस
योरितिरिक्तत्वेपि ध्वंसस्य प्रागभावोप्रतियोगिस्वरूप एवैवं प्रागभावस्य ध्वंसोऽपि प्रतियोगिरूपएवत्राघवात्तयाचरूपध्वंस
प्रागभावस्य रूपप्रागभावध्वंसस्यच रूपस्वरूपत्वात् प्रागभावध्वंसयोश्च सप्रतियोगिकत्वनियमाद्रूपप्रतियोगित्वं तद्ध्वंसप्रा

गभावयोरव्याहतत्वमित्यभिप्रायः ॥ यत्तु रूपवह्निन्नभेदस्य रूपस्वरूपत्वस्वीकारात्तादृशभेदप्रतियोगिरूपवह्निन्नांतःपातिरूपध्वं
सप्रागभावयोः रूपप्रतियोगित्वमित्यभिवर्णनं तदसत्तथा धूमवान्वह्नेरित्यादौ सर्वस्यैवातिव्याप्तिवारकधूमाभावादेर्विषयितयासावच्छि
न्नभिन्नभेदस्वरूपत्वात्तत्प्रतियोगिविषयितया स्वावच्छिन्नभिन्नत्वव्याप्त्यादिरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तिवार
णाय प्रतियोगितायां भेदानवच्छिन्नत्वविशेषणमावश्यकं ॥ नचैवं सत्युक्तौ साध्यत्वस्यान्यभेदस्यापि तादात्म्यसंबंधेन साध्यव्यापकतत्त
यात्तद्भेदस्यापि लक्षणघटकतया तस्य व्यापकताघटकतादात्म्यसंबंधेन भेदानवच्छिन्नप्रतियोगिताश्रयसामानाधिकरण्यवि
रहादव्याप्तिरिति वाच्यं ॥ व्यापकतावच्छेदकप्रतियोगितायामपि भेदानवच्छिन्नत्वस्य विवक्षितत्वादेवं च रूपवह्निन्नभेदीयरूपध्वं
सप्रागभावनिष्ठप्रतियोगिताया अतादृशत्वाद्ध्वंसादिरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्त्यप्रसक्तेः ॥ महाप्रलयेति ॥
खंडप्रलये परमाणुषु रूपसामान्याभावो न संभवति तथा सति भाविसर्गे रूपानुत्पादप्रसंगोऽसमवायिकारणाभावात्तदर्थं पर
माणुषु पाकस्यनेवरं पूर्वसिद्धरूपस्वीकारेण सतो प्रलयइस्य महाप्रलयइत्यर्थकरणं ॥ मानाभावादिति ॥ रूपध्वंसादिनं तदसंता
भावविरोधित्वे साधकाभावादिति प्रयोगो बाध्यः ॥ ननु घटो रूपसामान्याभाववान्निःसरूपत्वद्रव्यत्वादित्यनुमानमेव घटे रूपासंता
भावे प्रमाणमिति सत्यमाहानुमानं चेति ॥ अप्रयोजकोऽव्यभिचारशंकानिवर्तकतर्काभावेन साध्यहेत्वोः कार्यकारणभावाद्यनुपपत्त्यापा
दकत्तर्कस्यान्यमित्यर्थः ॥ प्रमात्मकेति ॥ तथा च रूपसामान्याभावो यदि रूपप्रागभावध्वंसावच्छिन्नो रस्तिः स्यात्तदा तद्ध्वंसप्रागभाव
वच्छिन्नघटध्वंसः किं प्रमाविषयो न स्यादिति तत्तर्केण रक्तरूपध्वंसप्रागभावयोः रक्तरूपसामान्याभावाविरोधित्वानुमानेऽप्रयोजकत्व

शंकानिरासः॥ यत्र घटादौ पाकादिति॥ अत्रेदं बोध्यं॥ अंतरात्पामे पूर्वरक्तापररक्ते चलरूपी घटे पि मध्यरक्ततादृशायां रक्त
॥५॥ रूपं नास्तीत्यापत्तिसंभवे पंचरूपी घटपर्यंतानुधावनं निर्बीजं॥ न च तत्र पूर्वरक्तापरप्रथमरक्तध्वंसप्रागभावयोः सामान्यधर्मावि
च्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तित्वस्वीकारादुक्तरूपं नास्तीति प्रतीतिविषयता दृशा व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरण
याः श्यलत्वासत्वान्नापत्तिसंभव इति वाच्यं॥ पंचरूपस्थलेपि प्राथमिकरक्तध्वंसमध्यरक्तप्रागभावयोर्मध्यरक्तध्वंसचरमरक्तप्रागभा
वयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तित्वोपगमेन तत्रापत्तेरसंभवात्॥ प्राचीनैर्विशेषाभावकूटस्य
सामान्याभावस्यास्वीकारादिष्टापत्तिरतो दूषणांतरमाहेत्यमिति॥ विनिगमाविरहेण सर्वस्यैवाभावस्याधिकरणविशेषकालवि
शेषावच्छेदेन घटत्वपटत्वादिधर्मावच्छिन्नप्रतियोगिताकत्वस्वीकारापत्ता नाभावभेदविलोप इत्यतो दूषणांतरमाहेत्यमिति॥ तत्स
मानाधिकरणत्तत्समनियतेति॥ अत्र समानाधिकरणेत्यनेन देशतो व्याप्यत्वं विवक्षितं समनियतेत्यनेन कालतः समनैयत्यं विव
क्षितं तेन समनियतस्य सामानाधिकरण्यनियमात् समानाधिकरणेति व्यर्थमिति शंकानवकाशः॥ यत्र संयुक्तयोः रक्तघटयोरे
कस्मिन् घटे रक्तरूपनाशोऽन्यस्मिन् रक्तघटे संयोगनाशश्चैकदोत्पन्नः काचन्तो रक्तध्वंससमनियतत्तादृशसंयोगध्वंसे रक्तत्वा
वच्छिन्नप्रतियोगिताकत्वस्वीकारापत्ता तादृशसंयोगध्वंसावगाहि रक्तघटे रक्तरूपं नास्तीति प्रतीतेः प्रमात्ववारणाय देशतो व्या
प्यत्वनिवेशः॥ एकाधिकरणे भिन्नकालोत्पन्नस्य शामरूपनाशस्यापि देशतो रक्तरूपध्वंसव्याप्यत्वाच्छ्यामनाशस्यापि रक्तकाले

रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारापत्त्या मरूपध्वंसावगाहित्वात्ः रक्तकाल रक्तकाले रक्तरूपं नास्तीति प्रतीतेः प्रमात्वा
पत्तिवारणाय कालतः समनैयसन्निवेशः हेत्वधिकरणसामान्यान्तर्भावेणेत्यर्थ इति। स्वविशिष्टहेतुमद्वृत्तियो यावंतो धर्माः
स्वप्रतियोग्यधिकरणत्वतत्तत्रत्यैकान्यत्रयवृत्तित्वमित्यर्थः। एतेनैकमात्रवृत्तिहेतुके हेत्वधिकरणसामान्याप्रसिद्धिः स्वविशिष्टहे
त्वधिकरणसामान्याप्रसिद्धिः स्वविशिष्टहेत्वधिकरणताव्यापकस्वप्रतियोग्यधिकरणताकत्वनिवेशे कपिसंयोगात्यन्ताभा
वस्य प्रतियोग्यधिकरणतायाः हेत्वधिकरणताव्यापकत्वेनाव्याप्तिविरहात् स्वविशिष्टविशेषणवैयर्थ्यापत्तिरित्यादिदूषणानवका
शः। धूमवत्त्वप्रकारकप्रमाविषयत्वाभावस्येति। महाकालस्य संयोगेन धूमवत्त्वमित्यभिप्रायेण इदमन्यथा त्वीदृशप्रमाविषय
त्वस्य महाकाले सत्त्वान्नैव तादृशप्रमाविषयत्वाभावस्य प्रतियोगिसामानाधिकरण्यं संभवतीति बोध्यं। ननु नधूमाभावमा
दायातिव्याप्तिवारणसंभवात्तावत्पर्यन्तानुधावनं निर्बीजमिति चेद् उच्यते। संयोगेन इत्यस्यापि वृत्तितामते धूमाभावस्या व्या
पि प्रतियोगिसामानाधिकरण्यं पर्वतादावस्तीति न तमादायातिव्याप्तिवारणमिति तावत्पर्यन्तानुधावनं। न च विशेष्यतायाश्च
पि ज्ञानसमानकालीनत्वमते ऽव्याप्यवृत्तित्वात्तादृशाभावस्यापि प्रतियोगिसामानाधिकरण्यमसत्त्वतस्याअतथात्वमताव
लंबनेन च इत्यस्याव्याप्यवृत्तित्वमतावलंबनेन प्रसिद्धधूमाभावमादायो निर्बीज एवेति वाच्यं धूमनिष्ठप्रकारतानिरूपितप्रमीय
विशेष्यतायाः सर्वमत एवाव्याप्यवृत्तित्वं तादृशविशेष्यतात्वस्य प्रमीयप्रमाविशेष्यतासाधारण्याद्धूमस्याव्याप्यवृत्तित्वं तु नत
थेति विशेषात्तान्नैवमपि नस्यापि व्यापकताघटकस्वरूपसंबंधेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधि

सामरत्न

करण्यनिवेशो नातिव्याप्तिरित्यभिप्रायात्॥ वस्तुतस्तु महाकालत्वे क्रियायाः योगोलकान्यत्तमात्समवेतत्वावच्छिन्नाभावमादाया
॥५१॥ तिव्याप्तिवारणबोध्यं तादृशाभावस्याप्यारिपदग्राह्यत्वात्॥ महाकाले चेत्सुत्रमित्ति॥ अथ चरमध्वंसात्मकस्याप्यभावस्यैतत्का
लीनघटध्वंसादेः प्रत्ययकालावच्छेदेन सत्वादेतत्कालावच्छेदेन प्रतियोगिनश्चासत्वात् संभवपदेवरं उ कालेप्रतियोगिसामानाधिकरण्य
नचक्रियामात्रस्यैवकालोपाधित्वमित्यभिप्रायेणेदमितिवाच्यं॥ तथासतिप्रत्ययस्यापि कालत्वानुपपत्तेः प्रत्ययवृत्तिमात्रकाल
त्वादिसत्वस्य सद्भुतत्वप्रसंगेनतत्रातिव्याप्तिदानस्यासंगमापत्तेरितिचेन्न॥ प्रत्ययस्यहिजन्यद्रव्यानधिकरणत्वे सतिद्रव्याधिक
रणत्वं प्रत्ययस्य कालत्वे चतादृशप्रत्ययमात्रमेव न स्यादिति क्रियातिरिक्तस्य प्रत्ययात्मकध्वंसस्यैव कालत्वं स्वीकीयते नतदति
रिक्तध्वंसस्येत्यभिप्रायान्न कोपि दोषः॥ अन्यथा पुनः सत्तावानितिः॥ यद्यपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वकल्पे
हेतुसामानाधिकरण्यांशे स्वरूपसंबंधावच्छिन्नत्वस्य निवेशावश्यकत्वं पूर्वमुक्तं तदीदानीकथं स्वविशिष्टसत्तानिवेशे तेन संबंधे
नहेतुसामानाधिकरण्यनिवेशं विस्मस्य सत्ताभावमादायाव्याप्तिप्रदर्शनं संगच्छत इति चेन्नाकावतरन्तितथापिगगनादिवृ
त्तित्वविशिष्टसत्ताभावमादायैवस्वविशिष्टस्यस्यावृत्तिर्विवक्षितेतिबोध्यं॥ यत्तु विशिष्टाभावमादाय सर्वत्रैतल्लक्षण
समन्वयात्प्रतियोग्यवृत्तित्वेतिग्रंथावतारकत्वानुपपत्तेर्विशिष्टाभावस्यसंबंधाभावरूपत्वमवश्यं वक्तव्यमित्तितादृशा
भावस्यलक्षणघटकतानसंभवतीतिकेनचिदुक्तं तन्न॥ प्रतियोग्यवृत्तित्वेतिग्रंथावतारकत्वानुपपत्तेरेवैतल्लक्षणं परिष्क
ष्यद्वितीयलक्षणानुसरणबीजत्वस्य वक्ष्यमाणत्वात्॥ अत्रेदं बोध्यं॥ द्वितीयलक्षणे व्यापकतायाः प्रतियोगिवैयधिकरण्या

घटिता एव निवेशेन तत्र हेतुसामानाधिकरण्यांशे स्वरूपसंबंधनिवेशावश्यकतया सत्तासाध्यके सत्ताभावस्य स्वरूपसंबंधे
न हेतुसामानाधिकरण्यविरहेण विशिष्टसत्ताभावस्य तल्लक्षणाघटकत्वेनाव्याप्तिरिहास्त्वविशिष्टेत्यप्यर्थमितिशेषं
पर्वदिशावसेयमिति दीधितिरसंगता । न च लक्षणे भावभिन्नत्वमेव निविष्टं न हेतुसामानाधिकरण्यांशे स्वरूपसंबंधनिवे
श इति वाच्यं कपिसंयोगात्यन्ताभावस्य दैशिकविशेषणतया हेतुसामानाधिकरण्यविरहेण भावभिन्नत्वविरहेण चेति द्विती
यलक्षणेऽग्रे यद्वदुक्तौ विशेषणद्वयनिवेशप्रयोजनाभावेन भावभिन्नत्वविरहेणेत्यस्य स्वरूपसंबंधेन हेतुसामानाधिकरण्ये हे
त्वर्थकतया आवश्यकत्वेन स्वरूपसंबंधस्यैव हेतुसामानाधिकरण्ये निवेशनीयत्वात् तेन च भावभिन्नत्वविरहे स्वरूपसंबंधे
न हेतुसामानाधिकरण्यं हेतुः संभवतीति नादर्शाद्व्यत्वाभावादेर्भावभिन्नत्वविरहाभावात् ॥ न च समुच्चयार्थकत्वेन सचकारासं
गतिरिति वाच्यं ॥ प्रतियोगिवैयधिकरण्याघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेऽसनेनैव समु णे
च्चयस्य विवक्षितत्वात् ॥ न च प्रतियोगिवैयधिकरण्याघटितव्यापकतायां साध्यवन्निष्ठत्वांशे स्वरूपसंबंधावच्छिन्नत्व
निवेशावश्यकतया कपिसंयोगात्यन्ताभावस्य स्वरूपसंबंधेन साध्यवन्निष्ठत्वविरहेण लक्षणघटकत्वसंभव एवेति वाच्यं ॥
स्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेनैव साध्यवद्वृत्तित्वस्य विवक्षणीयत्वादिति ॥ जलवृत्तिद्रव्यमिति । इदं
च जलादीति दीधितिग्रंथानुरोधेन वह्निमद्वृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य धूमाभावाधिकरणकस्य धू
माभावस्वरूपस्य वह्निमद्वृत्तिद्रव्यरूपप्रतियोगिसामानाधिकरण्यमादाय प्रसिद्धहेतुकव्यभिचारिण्यतिव्याप्ति

संभवात्॥ इदं तु बोध्यं॥ एवं रीत्या गदाधरग्रंथसंगमनेपि दीधितिसंगतिर्दुर्वारैवेति॥ अत्र केचित्॥ कालिकसंबंधे
न जलत्ववृत्तित्वविशिष्टस्य यः कालिकसंबंधेनाभावस्तस्य धूमाभावाधिकरणकस्य धूमाभावस्वरूपतासंभवात् का
॥५२॥ लिकसंबंधेन जलवृत्तित्वस्य रूपप्रतियोगितासामानाधिकरण्यमादाय धूमवान्वन्हेरित्यत्रैवातिव्याप्तिमभिप्रायकत्ता दीधि
तिग्रंथस्य संभवति॥ न चैतादृशाभावस्य नित्यसमावृत्तेर्न जलत्वाभावरूपतासंभवतीति वाच्यं॥ समवायसंबंधावच्छि
न्नप्रतियोगिताकजलत्वाभावासमनैयत्येपि कालिकसंबंधावच्छिन्नप्रतियोगिताकजलत्वाभावसमनैयत्येन तद्रू
पतासंभवादित्याहुस्तन्न॥ जन्यस्य कालोपाधितानभ्युपगंतृमतसाधारण्येनैव जलत्वादीतिग्रंथस्य व्यभिचारिवि
शेषपरत्वस्य गदाधरैरुक्तत्वात्॥ अथैवमप्ययोगोलकभिन्नस्यापि तादात्म्यसंबंधेन धूमं प्रति व्यापकतयाऽय
योगोलकभिन्नभेदस्य लक्षणघटकतया व्यापकघटकतादात्म्यसंबंधेनायोगोलकादौ तद्भिन्नरूपप्रतियोगिसा
मानाधिकरण्याभावान्नातिव्याप्तिः॥ न चैतादृशभेदाधिकरणजलवृत्तित्वविशिष्टगोत्वाभावतादात्म्यसंबंधेना
योगोलकवृत्तिद्रव्यान्यतराभावस्य तादृशभेदस्वरूपतया तादात्म्येनायोगोलकवृत्तिद्रव्यस्यापि तत्प्रतियो
गित्वात्तत्सामानाधिकरण्यमादायातिव्याप्तिरस्त्येवेति वाच्यं॥ तथा सति जलत्वादीतिग्रंथस्य व्यभिचारिविशेष

परत्वेन संगमनस्याप्युक्तत्वाद्रूपाभावाधिकरणकजलत्वहृद्दित्वविशिष्टगोत्वाभाववान्हिमहृत्तिद्र्व्यान्यतराभाववस्यापि धर्माभा
वकल्पनासंभवेन धर्मवांश्च न्हेरि सादावेवातिव्याप्तिसंभवादिति चेन्न॥ पूर्वोक्तमुक्त्या प्रतियोगिसामानाधिकरण्यघटकप्रतियो
गितायांभेदानवछिन्नत्वविशेषणावश्यकत्वेन तद्रूपवानेतत्कसादिसादौ पटभिन्नभेदस्य यावदंतर्गतस्य व्यापकताघटकता दा
त्म्यसंबंधेन भेदानवछिन्नप्रतियोगिताश्रयसामानाधिकरण्याभावादव्याप्तिचारणाय व्यापकतावछेदकप्रतियोगितायामपि
नादृशाविशेषणस्यावश्यकतया ऽयोगोलकभिन्नभेदस्यवछक्षणघटकत्वाभावात्॥ एवं सर्वत्र हेतुसमानाधिकरणमुभयत्वावछि
न्नाभावमितिगवाश्वत्वगगनोभयत्वाद्यवछिन्नाभावमिमर्थस्तादृशोभयत्वावछिन्नाभावीयप्रतियोगितायां अव्यासज्यवृत्ति
न त्वया साध्यवत्तितादृशप्रतियोगित्वावछिन्नाभावासत्त्वाल्लक्षणघटकत्वमव्याहतं॥ अथ द्वितीयचक्रवर्तिलक्षणे यथा व्यधि
करणधर्मावछिन्नाभावस्याप्रामाणिकत्वे सामानाधिकरण्येनावछेदकत्वमिसत्त्वसामानाधिकरण्येनेति व्यर्थं स्यादितितदाव
श्यकत्वं तथा ऽत्रापि व्यधिकरणधर्मावछिन्नाभावस्याप्रामाणिकत्वे साध्यवन्निष्ठाभावीयप्रतियोगितायां सामानाधिकरण्ये
नानवछेदकत्वरूपसाध्यव्यापकतावछेदकत्वघटकसामानाधिकरण्येनेत्यस्य वैयर्थ्यं स्यादितितदावश्यकत्वं॥ यदि च
प्रतियोगिवैयधिकरण्याघटितव्यापकतावछेदकत्वस्य गौरवग्रस्तत्वात्तद्घटितव्यापकतावछेदकत्वमेव ग्रंथे ग्रंथकृदभि
मतमितिमन्यते तदापि तादृशाव्यापकतावछेदकत्वस्य यादृशप्रतियोगितावछेदकविशिष्टानधिकरणं साध्यवतादृशप्र

प्रामरह

॥५२॥ तियोगितानवच्छेदकत्वरूपस्य शरीरे यादृशप्रतियोगितावच्छेदकविशिष्टत्ववैयर्थ्यं स्यादुर्वारत्वादिति चेन्न॥ साध्यवह्निष्ठ
भेदप्रतियोगियोगितावच्छेदकतानवच्छेदकत्वरूपस्यैव प्रतियोगिवैयधिकरण्यघटितव्यापकतावच्छेदकत्वरूपतायाः प्रा
ग्दर्शितत्वात्तच्च प्रतियोगितावच्छेदकविशिष्टत्वादेरनिवेशात्॥ न च तादृशावच्छेदकतानवच्छेदकत्वं तादृशावच्छेदकत्वत्वा
वच्छिन्नतादृशावच्छेदकत्वनिष्ठप्रतियोगिताकत्वं तच्च तादृशावच्छेदकत्वत्वेन घटाभावस्य घटाभावीयप्रतियोगिता
साधारण्येन घटाभावस्यापि लक्षणघटकत्वादसंभववारणायोपादेयप्रतियोगितायामवच्छेदकत्वनिष्ठत्वं व्यर्थं स्यादि
ति व्यधिकरणधर्मावच्छिन्नाभावस्यावश्यकत्वमस्त्वेवेति॥ मैवं प्रतियोगितासंबंधेन तादृशावच्छेदकत्वत्वविशिष्टविशिष्टाभा
वस्यैव निवेशात्समानाधिकरणधर्मावच्छिन्नाभावस्यैव तथात्वात्तस्य घटाभावीयप्रतियोगितासाधारण्यविरहात्
॥ एवं स्वविशिष्टसामान्ये साध्यवद्वृत्तिकिंचिद्व्यक्त्यसंबद्धत्वघटितलपरिष्कारेपि स्वविशिष्टत्वावच्छेदेनैव प्रतियोगित
यासाध्यवद्वृत्तिकिंव्यक्तिसंबद्धत्वत्वविशिष्टविशिष्टाभावएव निवेशनीय इति न कोपि पूर्वपक्षावकाश इत्यलं॥ ॥ इतिप्र
थमस्वलक्षणं॥ द्रव्यत्वेन धूमो नास्तीति॥ अत्र द्रव्यत्वेन धूमाभावीयप्रतियोगितायां द्रव्यत्वस्यावच्छेदकत्वेपि प्रति
योगितावच्छेदकेसनेन प्रतियोगितायाअनतिरिक्तवृत्तिसघटवच्छेदकमित्यादिविवक्षायामावश्यकत्वेन तादृशा
भावीयप्रतियोगितायां द्रव्यत्वादेरनतिरिक्तवृत्तित्वेनैव नातिव्याप्तिः॥ अथ सामान्यधर्मस्य विरोधाभावीयप्रतियो

गितायामवच्छेदकत्वस्वीकारेपि अत्र लक्षणे प्रमेयत्वेन गगनाभावस्य साध्याभावव्यापकतया तन्निष्ठप्रतियोगितावच्छेदकत्व
स्य प्रमेयत्वे सत्त्वाद्वाच्यत्वसाध्यकप्रमेयहेतुकेऽव्याप्तिरूपणे दीधितिकृतो विरुध्येत॥ न च प्रमेयत्वस्य प्रमाविषयत्वरूप
स्य विषयतापेक्षया गुरुत्वेनाभावप्रतियोगितावच्छेदकत्वं न संभवतीति समाप्तिसंगतिरिति वाच्यं॥ एवं सति प्रमेयत्वस्य गु
रुत्वेनानवच्छेदकत्वादिरूपेऽस्य प्रमेयत्वस्याधिकरणप्रतियोगितायामप्रसिद्धत्वादिति लिखितस्यानस्य भंगादिति चेन्न
॥ धूमवान्वह्नेरित्यादौ धूमाभावव्यापके वह्नित्वेनायोगोलकवृत्तिवह्नितदन्यवृत्तिवह्न्युभयाभावप्रतियोगितावच्छेद
कत्वमादायाव्याप्तिवारणाय स्वसमानाधिकरणस्वनिरूपकाभाववद्वृत्तितानवच्छेदकस्यावच्छेदकस्य प्रतियोगिताव
च्छेदकेऽस्य नेन विवक्षणीयतयोक्तस्थले प्रमेयत्वस्यानतिप्रसक्ततया तथात्वेनाव्याप्तिकथनविरोधाभावात्॥ अत्र केचित्॥ प्रतियोगि
तायां स्वेन वृत्तिभिन्नं स यदवच्छेदकमिति प्रथमपरिष्कारात्तिव्याप्तिवारणानुरोधेन वस्तुगतिमनुरुध्य वाङ्व्यत्वस्य
ताद्दशाभावप्रतियोगितावच्छेदकत्वनिराकरणमिसाधु॥ गगनानुद्व्यत्वेन धूमाभावीयप्रतियोगितायां द्रव्यत्वस्यावच्छेद
कत्वास्वीकारे स्वद्धूमवत्तानिश्चयोत्तरं द्रव्यत्वेन धूमाभाववत्ताबुध्यनापत्तिस्तस्या धूमवत्तानिश्चयप्रतिबध्यतावच्छेद
कधूमत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारताशालिबुद्धित्वाक्रान्तत्वादिति चेन्न॥ स्वद्धू[illegible]धूमत्वावच्छिन्नप्रति
योगितासंबंधावच्छिन्नस्वद्धूमत्वावच्छिन्नप्रकारताघटितधर्मस्यैव धूमवत्तानिश्चयप्रतिबध्यतावच्छेदकत्वोपगमात्॥

तादृशप्रतीतौ द्रव्यत्ववैशिष्ट्यस्याधिकस्य धूमांशेऽभानान्नोक्तापत्तिः ॥ द्रव्यत्वेन धूमाभावीयप्रतियोगितायां द्रव्यत्वस्यावच्छेदकत्वे चादि
नोपि द्रव्यत्वेन महानसीयधूमो नास्तीति बुद्धेर्धूमवत्तानिश्चयप्रतिबध्यत्ववारणाय निरुक्तरूपस्य प्रतिबध्यतावच्छेदकत्वोपगमस्याव
श्यकत्वाच्च ॥ धूमस्तु न्येऽङ्गारत्रोषे धूमवद्वृत्तित्वे विशिष्टवन्ह्यभावासत्वात्तादृशाभावस्य न धूमाभावसमनैयत्यसंभव इति धूमकालाव
रा४४॥ च्छिन्नेति धूमवद्वृत्तित्वे विशेषणं ॥ उक्तप्रतीतेर्वह्नित्वेऽवच्छेदकतावगाहित्वेपि तद्विषयस्य सामान्यरूपेण विशेषाभावत्वात्प्रसक्ते
रिसम्भवायेणाह स्तवे ति ॥ घटभिन्नत्वेनेति ॥ अवधूमत्वस्यावच्छेदकताप्रयोजकत्वतीयांतोच्छेरव्यत्वाभावात् दृष्टधूमभेदद्वया
वच्छिन्नप्रतियोगिताकभेदवत्वरूपान्यतरत्वावच्छिन्नरूपप्रतियोगिनीसास्याविशेषणत्वाभावाच्च तत्तादृशाभावप्रतियोगितावच्छे
दकत्वाक्रांतिध्येयं ॥ भेदत्वेनेति ॥ अत्राप्ययोगोल्कभेदशून्ये घटाभाववत्तितादृशप्रतीसत्तुदयापत्तेर्न तादृशान्यतरत्वमात्रस्य प्र
तियोगितावच्छेदकत्वं ॥ भेदत्वेनायोगोल्कभेदघटान्यतराभावस्य संयोगसंबंधावच्छिन्नप्रतियोगिताकस्य केवलान्वयित्वेनायोगो
ल्कभेदाभावसमनैयत्यं स्वरूपसंबंधावच्छिन्नप्रतियोगिताकस्य तत्समनैयत्यसंभवेप्ययोगोल्भेदशून्यस्य स्वरूपसंबंधेन तादृ
शान्यतरत्वावच्छिन्नवतोऽप्रसिद्धत्वेनातिप्रसंगविरहात्तादृशान्यतरत्वस्यैव प्रतियोगितावच्छेदकत्वसंभवेनातिव्याप्यप्रसक्तेस्ता
दृशाभावोपेक्षेतिध्येयं ॥ न्यूनवृत्तिचेति ॥ यद्यपि वाच्यत्वसाध्यकेत्वसेणघटकृशे यत्वेन वाच्यत्वाभावीयप्रतियोगितायान्यू
नवृत्त्येव ज्ञेयत्वं न्यूनवृत्तित्वनिरुक्तौ स्वपदेन तद्भावीयप्रतियोगिताया एवोपादेयतया समनीयताभावैक्यमते तादृशाभावस्य
वाच्यत्वत्वेन ज्ञेयत्वाभावाभिन्नतया तदीयप्रतियोगिताया ज्ञेयत्वेपि सत्त्वात्तथापि स्वसमानाधिकरणभेदप्रतियोगितावच्छेद

दकत्वस्वावच्छेदकत्वसामानाधिकरण्यैतत्त्रितयसंबंधावच्छिन्नप्रतियोगिताकतदभावीयप्रतियोगित्वाभाववत्तदभावीयप्रति
योगितावच्छेदकं न्यूनवृत्तिभिन्नं सद्यदवच्छेदकमित्यनेन विवक्षणीयमिति न दोषः॥ एतत्कल्पे साध्यव्यापकतावच्छेदकरूपावच्छि
न्नप्रतियोगितायामपि स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं देयं तेन न वह्निसाध्यके वह्नित्वेन महानसीयवह्निघटान्यतराभावस्य व्या
वर्तत गतिस्य प्रतियोगितायां न्यूनवृत्तिभिन्नावच्छेदकाप्रसिद्धावपि न क्षतिः॥ वन्ह्याद्यभावीयप्रतियोगितायाः प्रमेयसामान्य
क वृत्तित्वात्॥ अथवेति॥ स्वव्यापकतात्कान्यत्वेति॥ स्वनिरूपितत्वस्वाश्रयसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्वाश्र
यसामानाधिकरण्यैतत्त्रितयसंबंधेनावच्छेदकताविशिष्टान्यप्रतियोगितावच्छेदकत्वमेव तादृशोभयाभाववत्त्वप्रतियोगि
तावच्छेदकमित्यनेन विवक्षणीयमिति नाननुगमादिदोषः॥ एतत्कल्पे व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायामपि नि
रुक्तत्रितयसंबंधेनावच्छेदकताविशिष्टान्यत्वं देयं तेन न वह्नित्वेन महानसीयवह्निघटान्यतराभावीयतादृशावच्छेदकत्वस्याप्रसि
द्धावपि नाव्याप्तिः॥ अत्र स्वव्यापकत्वशरीरे स्वाधिकरणत्वस्य प्रतियोगितावच्छेदकताघटकसंबंधेनैव विवक्षणीयतया तादृशा
भावप्रतियोगितावच्छेदकताघटकः कालिकसंबंधो विषयितासंबंधो वा तदभावीयतादृशप्रतियोगितावच्छेदकत्वस्य स्वव्यापक
तत्त्वान्यत्वाप्रसिद्ध्याऽप्रसिद्धिरत आह॥ स्वन्यूनवृत्तिभिन्नायाः प्रतियोगिताया इति॥ अवच्छिन्नत्वसामानाधिकरण्यसमा
नाधिकरणभेदप्रतियोगितावच्छेदकत्वत्रितयसंबंधेन धर्मविशिष्टान्याया इत्यर्थस्तेन नाननुगमः॥ एतत्कल्पे व्यापकतावच्छेद
करूपावच्छिन्नप्रतियोगितायामपि निरुक्तत्रितयसंबंधेन धर्मविशिष्टान्यत्वं देयं तेन न वह्नित्वेन महानसीयवह्निघटान्य

ये तदभावीयप्रतियोगितायास्तादृशत्वविरहेप्यव्याप्तेः॥ निरुक्तकल्पे त्वेपि भावत्वरूपप्रतियोगिसामानाधिकरण्यनिवेशावश्यकत
यागौरवादाह॥ तत्प्रतियोगितासमानाधिकरणेति॥ एतत्कल्पे प्रतियोगिनीभावत्वनिवेशः प्रयोजनाभावादुपेक्ष्यः॥ असं
॥५५॥ भवइति॥ हेतुसमानाधिकरण्यांशेस्वरूपसंबंधनिवेशपर्यवसितत्वभावभिन्नत्वनिवेशाभिप्रायेण॥ अव्याप्तिवृत्तिव्या
पकतावच्छेदकरूपेभाववृत्तित्वनिवेशाकल्याभिप्रायेण॥ तत्कल्पेभाववभिन्नत्वनिवेशानत॥ प्रमेयसाध्यकस्थलेति॥ नन्वेव
तत्कल्पेधर्मसाध्यके कालिकसंबंधेन धर्माभावप्रतियोगितावच्छेदकविशिष्टवन्हिसामानाधिकरण्यमादायातिव्याप्ति
वारणाय प्रतियोगितावच्छेदकताघटकसंबंधेन प्रतियोगितावच्छेदकवैशिष्ट्यं निवेशनीयं तथा च वन्हिसाध्यकसद्धे
तौ विषयितया वन्हित्वविशिष्टाभावस्य प्रतियोगितावच्छेदकताघटकविषयितया प्रतियोगितावच्छेदकविशिष्टज्ञा
नादिना पर्वतादौ सामानाधिकरण्याभावादव्याप्तिवारणाय साध्यतावच्छेदकनिष्ठावच्छेदकतायां साध्यतावच्छेदकताघ
टकसंबंधावच्छिन्नत्वनिवेशावश्यकतया कथं संयोगादिसंबंधावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताकाभावमादायलक्ष
णसमन्वय इति चेन्न॥ अतिव्याप्तिवारणाय साध्यतावच्छेदकताघटकसंबंधेनैव प्रतियोगितावच्छेदकवैशिष्ट्यस्यनि
वेशपरत्वात्साध्यतावच्छेदकनिष्ठावच्छेदकतायां तत्संबंधावच्छिन्नत्वानिवेशात॥ लघुरूपसमनियतेति॥ प्रमेयव
न्हित्वाद्यवच्छिन्नसाध्यके सधर्मः॥ यद्यपि गुरुधर्मस्यावच्छेदकत्वं सिद्धांते आवश्यकमन्यथा साध्यवन्हिष्ठगोत्वाभावीय

प्रतियोगितायांच्छायघवेन गोसमवेतत्वस्यैवावच्छेदकत्वात् तद्भिन्नगवेतरासमवेतत्वसकलगोवृत्तित्वाभ्यां गोत्वभिन्ना
भावस्य यावदंतर्गतस्य गोत्वरूपप्रतियोगिसामानाधिकरण्याभावादसंभवापत्तेस्तथापि तत्समनीयताभावांतमादाय
तस्यापि प्रतियोगिसामानाधिकरण्यान्नासंभव इति तदनावश्यकं ।। ननु प्रमेयवह्निसाध्यके विषयितया प्रमेयवह्नि
त्वविशिष्टाभावस्यैवाप्रसिद्धेर्नाव्याप्तिः न हि वह्नित्वस्यैव तादृशाभावप्रतियोगितावच्छेदकत्वं संभवति प्रमेयवन्त्यवि
षयकवह्निविषयकज्ञानवति तादृशाभावासत्त्वप्रसंगात् ।। न च संयोगेन प्रमेयवह्निसाध्यके विषयितया प्रमेयवह्नि
त्वविशिष्टस्य संयोगेनाभावस्य केवलान्वयितया वह्नित्वस्यावच्छेदकत्वेपि संयोगेन विषयितया वह्नित्वविशिष्टस्यास
त्वादेरनातिप्रसंग इति वाच्यं ।। प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्य प्रयोजनाभावेनानिवेशात्समवा
येन तादृशाभावाप्रसिद्धेः ।। न च प्रमेयत्वविशिष्टात्मत्वसाध्यकेश्वरत्वहेतुके विषयितया साध्यतावच्छेदकविशिष्टाभा
वस्य हेतुसामानाधिकरण्यविरहेण अधिकरणधर्मावच्छिन्नाभावमादायाव्याप्तिः ।। साध्यतावच्छेदकनिष्ठावच्छेदकता
यां विषयितासंबंधानवच्छिन्नत्वनिवेशोऽस्यावश्यकतया गुरुधर्मावच्छिन्ननिरूपकसाध्यके तादृशावच्छेदकताकाभावाप्र
सिद्ध्याऽव्याप्तेर्दुर्वारत्वात् ।। पूर्वोक्तदिशातिव्याप्तेरिति ।। पूर्वलक्षणघटितत्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिक
रण्यमादायातिव्याप्तेरित्यर्थः ।। ननु पूर्वलक्षणघटितत्वविशिष्टस्वाभावत्वेन प्रतियोगितासमानाधिकरणत्वप्रतियोगिता

निरूपकाभाववद्वृत्तितावच्छेदकान्यत्वं प्रतियोगितावच्छेदकत्वाभावान्नोक्तातिव्याप्तिरिति चेन्न गतादृशाविवक्षाकल्पेव
न्हि साध्यके यावदंतर्गतिवह्नित्वेन महानसीयवह्निघटान्यतराभावस्य तादृशप्रतियोगितावच्छेदकाप्रसिध्याऽव्याप्तिवार
॥५६॥ णाय साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताया अपि स्वसमानाधिकरणस्वनिरूपिकाभाववद्वृत्तितावच्छेदकधर्मा
वच्छिन्नाया याः प्रतियोगितात्तत्तदन्यत्वनिवेशावश्यकतया संयोगेन द्रव्यस्याव्याप्यवृत्तित्वमते एतन्मते धूमाभावस्य लक्षणाघ
टकत्वानुपपत्या अधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तेर्वारणाय प्रतियोगितायामनतिरिक्तवृत्तिसद्यदवच्छेदकमित्येना
दृशाविवक्षणस्यैवादरणीयत्वेन पूर्वलक्षणवृत्तित्वविशिष्टस्वाभाववत्वे तादृशावच्छेदकत्वासत्ते रतिव्याप्तेर्दुर्वारत्वात्। न च तादृशप्र
तियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यनिवेशान्नातिव्याप्तिः सिद्धांतेऽपि प्रतियोगितावच्छेदकावच्छिन्नाभाववत्त्वस्यावश्य
कतया मन्मते तन्निवेशे गौरवविरहादिति वाच्यं॥ सिद्धांते तत्प्रतियोगितासमानाधिकरणसार्विकत्वस्यैवादरणीयत्वमा पूर्व
लक्षणवृत्तित्वविशिष्टस्वाभाववत्त्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमादायातिव्याप्त्यप्रसक्तेस्तदनावश्यकत्वात्॥
किंचैतन्मते संयोगेन द्रव्यस्याव्याप्यवृत्तित्वमते संयोगेन वन्ह्यादिसाध्यके साध्यतावच्छेदकसंबंधघटितव्यापकताप्रसिध्यर्थं सा
ध्यवन्निष्ठाभावे प्रतियोगिवैयधिकरण्यनिवेशावश्यकतया वाच्यत्वे साध्यकेऽपि दर्शितविशिष्टाभावमादाय लक्षणसमन्वयसंभवे प्रतियो
ग्यवृत्तित्वघटितग्रंथानुपपत्तिगौरवं च॥ न प्रतियोगितावच्छेदकसंबंधघटितव्यापकतावच्छेदकमिति। अत्र यद्यपि सिद्धांतेऽपि व्यधिकरण
धर्मावच्छिन्नाभावसंग्रहो न संभवति संयोगेन वाच्यत्वाभावस्यापि पूर्वलक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठायाः स्वप्रतियोगितात्द

वच्छेदकस्वरूपसंबंधघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितात्वेनलक्षणघटकतयातस्यचतादृशस्वरूपसंबंधेनवाच्यत्वरू
पप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमादायसर्वत्रलक्षणसमन्वयात्।नचसंयोगेनवाच्यत्वाभावीयप्रतियोगितायाःस्वसमा
नाधिकरणस्वनिरूपकाभाववद्वृत्तितावच्छेदकवाच्यत्वत्वावच्छिन्नत्वेनतदन्यत्वविरहात्तादृशाभावस्यनलक्षणघटकत्वमितिवाच्यं।स्वनिरूप
काभाववद्वृत्तित्वांशेस्वावच्छेदकसंबंधावच्छिन्नत्वनिवेशावश्यकत्वेनतादृशसंयोगेनवाच्यत्वादेरवृत्तेर्वाच्यत्वत्वस्यतादृशवृत्तितावच्छेदकत्व
नि विरहात्।नचैवंतादृशाभावस्यलक्षणघटकत्वेपितत्प्रतियोगितासामानाधिकरण्यस्यावच्छेदकत्वस्यवाच्यत्वत्वेऽसंभवेननतदवच्छिन्नसा
मानाधिकरण्यमादायलक्षणयोग्यइतिवाच्यं।तत्रापिस्वनिरूपकाभाववद्वृत्तित्वांशेस्वावच्छेदकसंबंधावच्छिन्नत्वविवक्षायाआवश्यकत्वेन
वाच्यत्वत्वेतादृशावच्छेदकत्वानपायात्।नचस्वनिरूपकाभाववद्वृत्तित्वांशेस्वावच्छेदकसंबंधावच्छिन्नत्वनिवेशेवन्ह्यादिसाध्यकेसत्तासामान्या
भावस्यापिलक्षणघटकतयायावदन्तर्गततादृशाभावीयप्रतियोगितानिरूपकाभाववृत्तिसामान्यादौस्वावच्छेदकसमवायसंबंधेनवृत्तेरप्र
सिध्यातत्प्रतियोगितासमानाधिकरणसाध्यवच्छेदकाप्रसिध्याऽव्याप्तिरितिवाच्यं।सत्ताभावस्यस्वरूपसंबंधेनहेतुसमानाधिकरणा
भावेनलक्षणघटकत्वविरहादितिपूर्वपक्षोवतरत्तितथापिव्यधिकरणधर्मावच्छिन्नाभावास्वीकारेतत्प्रतियोगितावच्छेदकसंग्रहायो
पात्तंतत्प्रतियोगितासमानाधिकरणेतिविशेषणंव्यर्थंस्यादितितदावश्यकत्वहीयच्चक्रवर्तिलक्षणवदितिबोध्यं।एवंवन्हि
त्वेनधूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टाभावस्यधूमाभावसमनियततयातदवच्छेदकवन्हित्वावच्छिन्नसामानाधिकरण्यमादायाति
व्याप्तिवारणायप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणमेवतदवच्छेदकत्वेनविवक्षणीयं।तथाचमहानसीयवन्ह्यभावस्यातथात्वाद
व्याप्तिर्नोव्यापकतावच्छेदकरूपपर्याप्तावच्छेदकताकप्रतियोगिताकाभावस्यैवविवक्षणीयतयानसर्वत्रविशिष्टाभावमादायलक्षण

सत्त्वं केत्तिध्येयं॥ पूर्वोक्तिरिरोति। सत्त्ववान्जातेरित्यादौ कालिकसंबंधेन हेतुसमानाधिकरणसत्ताभावमादायेत्यर्थः॥ ननु भावभिन्नाभाव
॥५०॥ निवेशे वह्निसाध्यकेघटहेतौ रूपध्वंसवदन्यत्वाभावस्य कालिकसंबंधेन हेतुसमानाधिकरणस्याभावरूपप्रतियोगिसामानाधिकरण्याभा
वादव्याप्तिरत आह॥ आस्त्वेतिग अस्त्वेवेति॥ संयोगध्वंसेनेति। तत्प्रतियोगिनासमानाधिकरणेत्यादिप्रतियोगितावच्छेदकनिवेशाभि
प्रायेणेदं तत्कल्पप्रतियोगिनिभावत्वस्यागत्योक्तत्वात्। अयोगोलकनाशजन्यसंयोगनाशासंभवस्खेत्यनुरोधेनाह॥ अनुयोगिनेति॥
वह्निप्रकारकप्रमाविषयत्वादेः कालेत्वसंदेहात्कालिकसंबंधपरित्यागः॥ प्रतियोगिरत्तयद्गतिः॥ प्रतियोगितावच्छेदकसमानाधिकर
णाद्यर्थस्तेनायोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावस्य तादृशविषयत्वादिनाप्रमेयाभावाभिन्नत्वेन प्रमेयप्रमात्वस्य तत्प्रतियो
गित्वेन तादृशाभावस्य प्रमेयरूपप्रतियोगिवृत्तित्वेपि नाव्याप्तिरिति ध्येयं॥ ॥इति द्वितीयस्वलक्षणं॥ ॥निरवच्छिन्नवृत्तिकत्वविशि
ष्टस्यकपिसंयोगाभावस्यमूड विरोध्यानतिरिक्ततया आसिताद्वस्त्ववमतआह॥ हेत्विति॥ आधेयतायाआधेयस्वरूपत्वे आधेय
तावच्छेदकरूपत्वेवाकपिसंयोगाभावत्वस्य यावानिरवच्छिन्नाधेयतायाहेत्वधिकरणनिरूपितत्वान्नपायादव्याप्तिनादेवस्त्ववमतआ
ह॥ हेत्वधिकरणनिष्ठेति॥ हेत्वधिकरणभूतेति॥ संयोगीसत्तादित्यादौ संयोगाभावनिष्ठताव्यक्तित्वस्य हेतुमन्निष्ठाभावप्रतियोगितानव
च्छेदकत्वविरहाव्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिरतो यत्किंचिदिति। तथा च संयोगाभावनिष्ठतव्यक्तित्वादेर्यत्किंचिद्धेत्वधि
करणगुणनिष्ठाभावप्रतियोगितानवच्छेदकत्वान्नातिव्याप्तिः॥ नन्वतिव्याप्तिर्नामासद्धेतौ लिंगकानुमितिजनकपरामर्शस्य प्रमात्वापत्ति
स्तच्चगुणनिष्ठाभावप्रतियोगितानवच्छेदकघटाभावनिष्ठतव्यक्तित्वं नादृशाभावप्रतियोगितानवच्छेदकत्वावगाहिज्ञानस्य प्रमात्वविर
हेपि द्व्यस्यापि हेत्वधिकरणत्वान्निष्ठाभावप्रतियोगितायां सामानाधिकरण्येनानवच्छेदकं यत्भावनिष्ठतव्यक्तित्वं तादृशाभावप्रतियो

मितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणहेतुमान् इति परामर्शस्य प्रमात्वानपायात् ततो गुणः संयोगवान् इति भ्रांतस्यानुमि
तिर्दुर्वारा मैवं। स्वनिष्ठाभावीयप्रतियोगिताविशिष्टत्वं व्याप्तित्वं तच्च संबंधेन हेत्वधिकरणविशिष्टाभावप्रतियोगितावच्छेदकत्वसा
मान्याभावावगाहि ज्ञानस्यैव कारणत्वोक्तापत्तेरभावात्। न प्रतियोगितावैशिष्ट्यं च सामानाधिकरण्यावच्छेदकत्वोभयाभाववत्त्वसं
बंधेन बोध्यं। अधिकरणधर्मावच्छिन्नाभाववन्निष्ठतव्याप्तित्वस्यापि हेत्वधिकरणनिष्ठ अधिकरणधर्मावच्छिन्नाभावप्रतियोगिता
च वच्छेदकत्वात् तादृशाभावाप्रसिद्धेरतः सामानाधिकरण्येनेति। अत्रैहेत्वधिकरणवृत्तित्वांशो संबंधविशेषानिवेशो संयोगीजन्य
सत्त्वादिसाध्यके संयोगात्मकाभावस्यापि कालिकसंबंधेन हेत्वधिकरणवृत्तित्वात् संयोगाभावस्य लक्षणाघटकत्वेन अधिकरणध
र्मावच्छिन्नाभावमादायातिव्याप्तिः स्यात् इतोऽस्वीयया दृशानिरूपकताश्रयवत्ताज्ञानं प्रतियेन संबंधेन स्वाश्रयावत्ताज्ञानं विरोधिने
न संबंधेन साध्यतावच्छेदकसंबंधेन वा तन्निवेशानीयत तथा च द्रव्यत्वसाध्यके द्रव्यध्वंसान्यतरत्वादावतिव्याप्तिर्हेतुमन्निष्ठध्वंसेतता
दृशासमवायसंबंधेन दृसप्रसिद्धेः द्रव्यं च द्रव्यत्वस्य तेन संबंधेन वृत्तेः अधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वादिति स
स्वरसः आहुः इयमनेन सूचितं। परे तु सादिमते अधिकाधिकरणतास्वीकारात् स्वरससंभावात् दैशिकविशेषणतास्वीकारे
तु हेतुमति लिंगबाधकविरहादिति द्रव्यान्यत्वविशिष्टसत्ताभाववसाध्यके सत्तायाः साध्याभावरूपत्वे गुणादौ तादृशाभावो नास्तीति
व्यवहारस्य तादृशाप्रतीतौ विशिष्टाधिकरणताया नियामकत्वमंगीकृत्य वारणे विवक्ष्यमाणप्रतियोगिमत्ताग्रहविरोधिता नि
यामकसमवायसंबंधेन तस्या हेतुमद्वृत्तितया अव्याप्तिरिति विशिष्टाधिकरणताया एव विशिष्टाभावाभाववत्त्वमभ्युपगतं

तथाह न बाधकमस्तीति भावः। स्वीययादृशप्रतियोगिताश्रयवत्ताज्ञानं प्रतीति। अत्र प्रतियोगितायां स्वीयत्वविशेषणं व्य
ग ५०ग र्थं प्रतियोगितावच्छेदकरूपेण प्रतियोगिमत्तावगाहिज्ञानस्यापि प्रतिबध्यत्वात्प्रतियोगिप्रकारकत्वनिवेशो व्यर्थ इति तत्परिस
ऽजेति। एवं चेति। प्रयोजनाभावादिति। अथ प्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानसामान्यं प्रतीसवरूपं वक्तव्यम
न्यथा आकाशाभावप्रतियोगितावच्छेदकाकाशाभावाभावत्वावच्छिन्नप्रकारकाकाशत्वावच्छिन्नप्रकारकसमूहालंबनं प्रति दै
शिकविशेषणतासंबंधेनाकाशाभाववत्ताज्ञानस्य प्रतिबंधकतया दैशिकविशेषणताया निरुक्तसाध्यके संग्रहो दुर्वारि
स्तथा च तादृशसामान्यांतर्गतिघटत्वादिनावच्छिन्ना घटाभावप्रतियोगितावच्छेदकघटत्वादिना घटावगाहिज्ञानं प्रति घटत्वादिना
वच्छिन्नाभावाद्यवगाहिज्ञानस्याप्रतिबंधकतया तादृशाभावासंग्रह इति यादृशप्रतियोगिताश्रयप्रकारकत्वमात्रं रूपकमिति चे
न्न। प्रतियोगिप्रकारकत्वनिवेशेपि वन्हित्वादिविषयकस्य घटत्वेन वन्हिमत्ताज्ञानस्यापि तादृशज्ञानसामान्यांतर्गततया तद्दोष
वारणासंभवादिति समूहालंबनमादाय परशिष्टदोषवारणं तु यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगितासंबंधा
वच्छिन्नप्रकारतावच्छेदके तदुभयातिरिक्तधर्मावच्छिन्नप्रकारतास्पृगन्यज्ञानं प्रतीति विवक्षया कर्तव्यं। साध्यतावच्छेदकप्र
कृतप्रतियोगितावच्छेदकातिरिक्ते त्विति। अथैवं विवक्षणे वन्हित्वेन घटाभाववत्ताज्ञानस्य वन्हित्वेन घटवत्ताज्ञानं प्रत्ये
व प्रतिबंधकतया तादृशज्ञानस्य च साध्यतावच्छेदकप्रकृतप्रतियोगितावच्छेदकातिरिक्तघटत्वानवच्छिन्नप्रकारताकत्व
विरहेण वन्हित्वेन घटाभावस्य लक्षणाघटकतयैवाव्याप्त्यप्रसक्तेस्तद्वारणायोपात्तसाध्याभावपदवैयर्थ्यमिति चेन्न।

विषयितया वह्नित्ववतो वह्नित्वेनाभाववमादाय वह्निसाध्यकेऽव्याप्तिवारणाय तदावश्यकत्वात्॥ साध्यतावच्छेदकव्याप्यप्रतियो
गिताकत्वस्य तदर्थत्वाच्च न ज्ञानवानात्मत्वादिसौ कालिके न ज्ञानत्ववतो ज्ञानत्वेनाभाववमादायव्याप्तिः। न चैवं गुणवान्द्रव्यत्वादित्या
दौ विषयितया गुणत्वादिविशिष्टाभाववमादायाव्याप्तिवारणार्थमुपात्तं प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटक
संबंधावच्छिन्नत्वं व्यर्थं तादृशाभावस्य ज्ञानत्वव्याप्यप्रतियोगिताकत्वविरहादिति वाच्यं॥ समवायेन घटपटोभयत्वविशिष्टस्य स
मवायेन साध्यतायां तंतुकपालान्यतरत्वहेतौ पर्याप्तिसंबंधेन तादृशोभयत्वविशिष्टाभाववमादायाव्याप्तिवारणात्तदावश्यकत्वात्
गुणवान्द्रव्यत्वादित्यादावव्याप्तिवारणप्रयोजनकथनं यथाश्रुतनाभिप्रायेणेति बोध्यं॥ इदमत्र चिंत्यं॥ एवं रीत्या साध्याभावा
द्यासार्थक्येऽपि सर्वत्र वह्नित्वावच्छिन्नाभाववमादाय लक्षणसमन्वयप्रदर्शनमसंगतं स्यात् तस्य साध्यतावच्छेदकव्याप्यप्रतियो
गिताकत्वविरहात्॥ न च तद्वृत्तित्वविशिष्टसाध्यतदन्यतरवृत्तित्वविशिष्टसाध्याभ्याभावमादायैव लक्षणसमन्वयो विव
क्षित इति वाच्यं॥ एकमात्रवृत्तिसाध्यके तादृशाभावाप्रसिद्धेः॥ लक्षणविशेषविशिष्टसाध्याभावस्य हेत्वधिकरणे व्याप्य
वृत्तित्वविरहात्तद्व्यधिकरणधर्मावच्छिन्नाभावस्यावश्यकत्वादिति॥ यदि च स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायां निवे
श्य साध्यतावच्छेदकव्याप्यत्वविशेषणं वारणीयाव्याप्तिवारणं सर्वत्रैवेति ग्रंथसंगमनं च भवेदिति न्यूनवृत्तित्वस्य प्रतियोग्यवृत्तित्वस्य
प्रतियोग्यवृत्तित्वविशिष्टभिन्नभेदघटितत्वादिस्फुच्यतेतेन दान्यूनवृत्तित्वस्य विरहव्यापारत्तस्यापि विशेषप्रयोजनाभावेन वह्नित्वेन
घटाभावीयप्रतियोगितायास्तादृशत्वविरहाद्वक्ष्यमाणसमनीयत्तनानाधर्मावच्छिन्नप्रतियोगिताभेदमताभिप्रायेणापित

त्सार्थक्यासंभवादिति॥ सर्वत्र वह्नित्वावच्छिन्नप्रतियोगिताकसाध्याभावमादायेति॥ ननु वह्निसाध्यके वह्निघटोभयाभावीयप्रतियो
॥५९॥ गितावच्छेदकतायाः साध्यतावच्छेदकताघटकसंबंधावच्छिन्नाया अप्रसिध्यान ताद्दशाभावमादाय लक्षणसमन्वय एवमेतद्रूपवा
नेतद्रूसादिसाद्यवपि तत्र विशिष्टाभावस्य हेत्वधिकरणे व्याप्यवृत्तित्वविरहात् उभयाभावीयप्रतियोगितावच्छेदकतायाः साध्यता
वच्छेदकताघटकसंबंधावच्छिन्नत्वविरहाच्च॥ एतेन वह्निसाध्यके महानसीयवह्न्यभावमादाय लक्षणसमन्वयेऽपि न क्षतिः॥ अत्र
त्र केचित्॥ महानसावृत्ति वह्न्यभावीयप्रतियोगितानिरूपितसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकतापर्याप्त
वह्नित्व एव सत्त्वाद्वह्निसाध्यकेऽव्याप्तिवारणाय साध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकताकाया हेतुसमानाधिक
रणाभावीयप्रतियोगितात्तदवच्छेदकतात्वावच्छिन्नपर्याप्तिमन्यत्वस्येवानवच्छेदकपदेन विवक्षणीयत्वेनैतद्रूपतद्रूपोभयाभा
वीयप्रतियोगितायामव्यतरणत्रयोक्तरीत्यैतद्रूपत्वतद्रूपत्वद्वित्वे तत्त्रितयस्यावच्छेदकत्वावरूपकत्वात्ताद्दशोभयाभावीयप्र
तियोगितायाअपि साध्यतावच्छेदकताघटकसमवायसंबंधावच्छिन्नैतद्रूपत्वतद्रूपत्वनिष्ठावच्छेदकताकत्वात्क्षतेरित्याहुः॥
परे तु प्रतियोगितायां साध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वदानेऽपि कालिकेन महानसीयत्वविशिष्टस्य समवायेन
वह्नित्वविशिष्टस्य साध्यतायां सद्धेतौ समवायेन महानसीयत्वविशिष्टस्य कालिकेन वह्नित्वविशिष्टस्याभावमादायाव्या
प्तिवारणाय स्वानवच्छेदकसंबंधावच्छिन्नत्वस्वसमानाधिकरण्योभयसंबंधेन साध्यतावच्छेदकताविशिष्टान्यत्वस्य हेतु
समानाधिकरणाभावीयप्रतियोगितावच्छेदकतायामवश्यं निवेशनीयतया गुणवान्द्रव्यत्वादित्यादौ विषयितया गुणत्व

विशिष्टाभावीयप्रतियोगितावच्छेदकतायां तादृशोभयसंबंधेन साध्यतावच्छेदकताविशिष्टान्यत्वविरहेणाव्याप्तिप्रस
क्तेः प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वस्यानिवेशनीयतया नोक्तपूर्वपक्षावसर
इति वदंति ॥ ननु हेतौ यल्लक्षणे व्यधिकरणधर्मावच्छिन्नाभावास्वीकारे वन्हित्वादिना घटाभावमादायाव्याप्तिवारणायो
पात्तसामानाधिकरण्येनेसस्य वैयर्थ्यं स्यादिति तदावश्यकत्वं दर्शयिष्यतेलह्दिहाव्यधिकरणधर्मावच्छिन्नाभावा
स्वीकारे वन्हित्वादिना घटाद्यभावमादायाव्याप्तिवारणायोपात्तसाध्याभाववैयर्थ्यं स्यादिति तदावश्यकतासंभवती
ति चेन्न । अखंडाभावघटकतासंपादकत्वेन साध्याभावांशस्यावसार्थक्यसंभवात् ॥ न हि हेतौ यल्लक्षणेप्येवं संभवती
व्यधिकरणधर्मावच्छिन्नाभावास्वीकारे हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकत्वतादृशाभावीयप्रतियोगिता
या सामानाधिकरण्येनावच्छेदकत्वयोः समनैयत्येन समनियतनानाधर्मावच्छिन्नप्रतियोगितानानाभेदस्यान्यत्रोक्तत्वेना
भावभेदप्रयोजकप्रतियोगिताभेदविरहात् ॥ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वतादृशसाध्याभावप्रति
योगितावच्छेदकत्वयोः समनैयत्यविरहेण तद्वच्छिन्नाभावयोर्भेदस्यावश्यंवक्तव्यत्वात् ॥ यादृशप्रतियोगितावच्छेदकविशि
ष्टेति ॥ यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वयादृशप्रतियोगिताश्रयाधिकरणत्वोभयाभाववत्त्वमेवोभयान
धिकरणत्वं तेन द्रव्यं सत्तादित्यादौ नातिव्याप्तिः ॥ वन्हिभिन्नेऽसंभावितत्वेति । वन्हिभिन्नत्वेन वन्ह्यभाववन्हिभिन्नत्वेन वन्हितद
न्योभयाभावयोः समनैयत्येनावच्छेदकैक्येन च तदीयप्रतियोगितयोरप्यैक्यमिति तादृशाभावीयप्रतियोगितायां वन्हिभि

न्नेपि संभवत्त्व नाशंक्यं ॥ वन्हिभिन्नत्वेन वन्हितदन्योभयाभावीयप्रतियोगितायाः अस्तां वेयवजरणग्रंथोक्तरीत्या व्यास
॥६०॥ ज्यवृत्तित्वेन वन्हिभिन्नत्वेन वन्ह्यभावीयप्रतियोगितातो विलक्षणत्वेन तत्पर्याप्त्याश्रयानधिकरणत्वस्य हेतुमति वन्हि
मन्योऽसत्वात्॥ अथवा वक्ष्यमाणरीत्येति॥ चैत्रान्यत्वविशिष्टत्वदंडसाध्यक एतद्दंडसंयोगहेतुके व्यभिचारिण्येतद्दंडसं
योगसामान्ये विशिष्टाभावप्रतियोग्येतद्दंडप्रतियोगिकत्वचैत्रानुयोगिकत्वोभयसत्वेन विशिष्टाभावस्य लक्षणघटकत्वानुप
पत्तिरतो याद्दृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगित्वनिवेशः॥ धूमसंयोगधूमत्वविशिष्टप्रतियोगिकत्वधूमप्र
तियोगिकत्वयोर्द्वयोःसत्वेन धूमसाध्यके व्यभिचारिणि धूमाभावस्य लक्षणघटकत्वार्थं हेत्वधिकरणयत्किंचिद्व्यक्त्यनुयो
गिकत्वनिवेशः॥ तन्नैव धूमसंयोगे वन्हिमदनुयोगिकत्वस्यापि सत्वेन धूमाभावस्य लक्षणघटकत्वानुपपत्तिरतो यत्किं
चिदिति॥ वन्हित्वेन घटाभावसंग्रहाय यादृशप्रतियोगिताश्रयप्रतियोगिकत्वनिवेशः॥ लाघवादाह॥ अथवेति॥ साध्य
निष्ठताद्दृशप्रतियोगिताप्रसिध्या न पूर्वोक्तलक्षणे प्रतियोगिव्यधिकरणत्वे निवेशितमिति॥ अथ घटत्वेनैतद्रूपं नास्ती
ति प्रतीतौ घटत्वस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशे स्वातंत्र्येण भानस्याभ्युपगतत्वेन घटत्वावच्छिन्नैत
द्रूपनिष्ठप्रतियोगित्वसंबंधावच्छिन्नघटत्वनिष्ठप्रकारतावच्छेदकघटत्वत्वावच्छिन्नानधिकरणत्वस्य हेतुमति सत्वाद्घ
टत्वावच्छिन्नैतद्रूपनिष्ठप्रतियोगितैव ताद्दृशी प्रसिद्धेति चेन्न॥ घटत्वेनैतद्रूपाभावप्रतीतौ घटत्वादेः स्वावच्छिन्नप्रति

न योगिताकत्वसंबंधेनभानेपिनादृशसंबंधस्यपरंपरासंबंधघटत्वनिरूपकारतायाविशेष्यीभूतप्रतियोगित्वसंबंधनिष्ठसांस
र्गिकविषयितानिरूपितत्वरूपत्वादृशप्रतियोगित्वसंबंधावच्छिन्नत्वविरहात्॥ अस्तु वा विशिष्टस्यैव तादृशप्रतियोगिताक
त्वस्यसंबंधनातथापि रूपत्वेन रूपं नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगित्वसंबंधावच्छिन्नरूपत्वनिष्ठप्रकारतावच्छेदकरूपत्व
त्वावच्छिन्नानधिकरणत्वमादाय रूपवान् पृथिवीत्वादित्यादावव्याप्तिवारणाय प्रकारतायां प्रतियोगिनिष्ठत्वनिवेशस्यावश्यके
त्वान्न दोषः॥ न चैवमपि रूपघटोभयाभावीयप्रतियोगितामेतद्रूपतद्रूपान्यतरत्वस्योभयाभावीयप्रतियोगितां चादाय ता
दृशप्रतियोगित्वप्रसिद्धिः संभवतीति वाच्यं॥ वह्नित्वेन महानसीयवह्निघटान्यतराभावीयप्रतियोगितामादाय व्याप्ति
वारणाय प्रकारतायां साध्यतावच्छेदकव्याप्यत्वस्यैव निवेश्यत्वात्तादृशप्रतियोगित्वयोरतादृशत्वात्॥ प्रतियोगितावच्छेद
कतये पृथक्त्वेन वह्नित्वादेरभावांतरप्रतियोगितावच्छेदकत्वेपि न नियमभंगः॥ तेजस्त्वादीनि विकल्पकोनतरमंधकारादेरि
दमिति प्रतीतिनिर्वाहायाभावे प्रतियोगिविशेषितेति विशेषणं देयं॥ प्रसज्यस्यापीति॥ प्रकृष्टप्रतियोगितासंबंधेन विशेष्ये
विशेषणमितिरीत्या वह्निर्नास्तीति प्रसज्यस्येत्यर्थः॥ सामानाधिकरण्येनावच्छेदकतयाऽव्याप्तिरिति॥ अत्रासंभव एव सं
भवति। न च गुरुधर्मस्यानवच्छेदकत्वेनैतद्दावच्छिन्नसाध्यके लक्षणासमन्वय इति वाच्यं॥ तन्मते पारिभाषिकावच्छेदकत्वस्यैव
निवेश्यत्वादिति ध्येयं॥ नन्वेवं सामानाधिकरण्येत्यस्य वैयर्थ्यमत आह॥ तदपीति॥ नन्वेवं प्रतियोगप्रदत्ति श्चेत्यादिग्रंथाव
तारकत्वानुपपत्तिरिति चेन्न॥ व्यधिकरणधर्मावच्छिन्नाभावास्वीकारे प्रतियोगितावच्छेदकतावैलक्षण्यस्य प्रतियोगिवैय्य

व्यापरत्न

धिकरण्ये सामानाधिकरण्यांशस्य व्यर्थतायामेव तद्घटितत्वात्पर्याप्तिः ॥ अव्ययीभावेति ॥ यद्यप्यव्ययीभावोत्तरं मत्वर्थी
॥६३॥ यइनिप्रत्ययो न भवति न कर्मधारयान्मत्वर्थीय इत्यनुशासनविरोधो नः ॥ तथापि व्यभिचारस्याभावो यत्रेति व्यधिकरण
बहुव्रीहावनुशासनाभावेन नास्ति व्यभिचारो यत्रेति बहुव्रीहौ न तत्र परलोकस्तृणीकत्वापत्तात दृशानुशासने बहुव्रीहि
पदं यथाश्रुतमेव प्रकृतप्रयोगवशाच्च न नञ्समासो न्यसमासे परं वेसम्भिप्रायः ॥ अव्यभिचारि संबंध इत्यत्राव्यभिचा
रिणः संबंध इति षष्ठीसप्तमी अभिप्रेत्याशंकते ॥ नचेति ॥ अव्यभिचारीति ॥ नचाव्यभिचारनिरूपकार्थकत्वं तत्पदार्थ यच्छ
ब्द एवायं नियमो ऽन्यत्र तु हेतुसमानाधिकरणे साध्ये क्रमेणेवेति नायं दोष इति वाच्यं ॥ प्रथमे दोष एव निर्भरात् ॥ अव्य
भिचारिणी संबंध इति सप्तमी अभिप्रेत्याथेति पूर्वपक्षं समाधत्ते ॥ नेति ॥ नच यद्रूपावच्छिन्नस्येति ॥ यद्रूपं हेतुव्यापक
साध्यसामानाधिकरण्यत्वं तदन्यरूपमव्यभिचारिहेतुनिष्ठसाध्यसामानाधिकरण्यत्वं ॥ अव्यभिचारिसंबंधरूप
तोपपत्तेरिति ॥ साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यत्वेन तत्प्रतिपाद्यतासंभवादित्यर्थः ॥ उ
क्तलक्षणेपीति ॥ यत्समानाधिकरणा इत्यादिदीधितिकारीयलक्षणेपीत्यर्थः ॥ प्रतियोगीति ॥ यावदभावकत्वस्य
हेतुनिष्ठाधेयत्वरूपत्वात्स्वोक्तरीत्या अव्यभिचारिसंबंधरूपता ॥ स्वविशिष्टहेत्वधिकरणावच्छिन्नत्वस्वप्रतियोगिनि
रूपितत्वोभयसंबंधेनाभावविशिष्टसामानाधिकरण्यमाप्यं यत्साध्यव्यापकवच्छेदकप्रतियोगिताकत्वविशिष्ट
सामानाधिकरण्यनिरूपकता संबंधेन तद्वत्त्वस्य तादृशलक्षणवाक्यपर्यवसितार्थस्य प्रत्येसोक्तरीत्या ऽव्यवचारिसंबंध

तत्व

रूपतासंभवाच्च ॥ तथाच पारिभाषिकमेवाव्यभिचारित्वं मिसनेन नतस्य पारिभाषिकत्वप्रतिपादनासंगतिरित्तिभावः ॥ अनवछेद
कत्वमिसस्यावच्छेदकत्वपदार्थ इत्ति नाद्योऽवच्छेदकत्वपदाभावादत्तोत्याचष्टे ॥ अनवच्छेदकमिसत्वेत्ति ॥ अवच्छेदकपदस्य पर्या
प्तिसंबंधेनावच्छेदकताविशिष्टतात्पर्यकत्वात्पर्याप्तिसंबंधेनावच्छेदकत्वं तात्पर्यविषयतावच्छेदकमित्तिभावः ॥ स्वविशिष्ट
संबंधीत्ति ॥ अत्र हेतुसमानाधिकरणाभावीयप्रतियोगितायाः स्वविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितायाश्च सामा
नाधिकरण्येनावच्छेदकत्वं निवेश्यं तेन वन्हित्वेन घटाभावीयप्रतियोगितावच्छेदकस्य स्वविशिष्टसंबंधिनिष्ठाभाव प्रति
योगितायाः अनवच्छेदकत्वेऽपि नाव्याप्तिः ॥ न वा अनवच्छेदकतयाऽभिमतस्य स्वविशिष्टसंबंधिनिष्ठव्यधिकरणधर्मावच्छिन्नाभाव
प्रतियोगितावच्छेदकत्वेऽपि पारिभाषिकावच्छेदकत्वाप्रसिद्धिः ॥ एवं सत्ति वन्हित्वेन घटाभावमादाय प्रथमलक्षणे साध्याभा
वपदसार्थक्यासंभवेऽपि वन्हित्वेन वन्हिघटान्यतराभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकमात्रप्रतियोगिताका
भावपरत्वस्य तदसार्थक्यमवसेयमित्तिदिक् ॥ ॥ इत्तिचक्रवर्त्तिलक्षणानि ॥ ॥ विशिष्टाभाव इत्यादि ॥ द्विता
वच्छिन्नसाध्यके व्यभिचारिणी व्यभिचारनिरूपकाधिकरणावृत्तितावच्छिन्नाभावमादायातिव्याप्तेर्निरासः ॥ अन्यथैवं विशिष्ट
सत्तावान् जातेरित्यादौ विशिष्टाभावस्य साध्यप्रतियोगिकत्वविरहेण सत्ताभावस्य साध्यप्रतियोगित्वेऽपि हेतुसामानाधि
करण्यविरहेण व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः ॥ न च गुणावृत्तितावच्छिन्नाभावस्य साध्यप्रतियोगिकत्वेन
तमादायातिव्याप्तिवारणं शक्यं ॥ विशेष्ये सत्तो गुणावृत्तित्वस्य विशिष्टेऽभावानुपगमात् अन्यथा घटवृत्तित्वविशिष्टवाच्य
त्वे पटावृत्तित्वासत्वेन तद्वच्छिन्नाभावस्यापि साध्यप्रतियोगिकत्वेन तमादाय वाच्यं ज्ञेयत्वादित्यादौ लक्षणसमन्वयसंभ

त न व्यधिकरणधर्मावच्छिन्नाभावस्यानावश्यकत्वप्रसंगात्॥ एवं द्रव्यत्वेन द्रव्यत्वसत्तान्यतराभावमादायैव विशिष्टसत्ता
साध्यकेऽतिव्याप्तेर्वारणात्॥ न च ताद्रशाभावस्य द्रव्यत्वाभावसमनीयतत्वेन द्रव्यत्वप्रतियोगिकत्वमेव स्वीक्रीयतद्
११६२॥ इति वाच्यं। सत्तायामपि ताद्रशप्रतीतावुल्लेखात्तत्प्रतियोगिकत्वावश्यकत्वमित्यभिप्रायात्॥ अथैवं व्यंतद्रूपान्यत्वविशि
ष्टसत्तावान् जातेरित्यादावतिव्याप्तिः॥ कथं वा यत्ते विशिष्टाभावस्य लक्षणघटकताभावात्॥ द्रव्यत्वेन द्रव्यत्वसत्तान्य
तराभावादेः साध्यसामानाधिकरण्यात्॥ न चैतद्रूपभेदत्वेनैतद्रूपभेदसत्तान्यतराभावस्य साध्यप्रतियोगित्वपदान्योगि
कस्य साध्यसामानाधिकरण्यविरहेणैवतत्वातिव्याप्तिवारणमिति वाच्यं॥ ताद्रशान्यतराभावस्य समवायसंबंधावच्छि
न्नप्रतियोगिताकस्य हेतुसमानाधिकरणस्य साध्यतासामानाधिकरण्यात्स्वरूपसंबंधावच्छिन्नप्रतियोगिताकस्य तस्य सर्वत्र
व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावमादाय लक्षणसमन्वयाव्यधिकरणधर्मावच्छिन्नाभावस्यानावश्यकत्व
वारणाय विवक्षणीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वविरहात्॥ न च व्यधिकरणसंबंधावच्छिन्नाभाववार
णाय प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वं विहाया वच्छिन्नत्वं प्रतियोगित्वे चोभयसंबंधेन संसर्गविशि
ष्टान्यत्वस्यैव निवेशेन व्यधिकरणसंबंधावच्छिन्नाभाववारणस्य निरुक्तान्यतराभावस्य च संग्रहः॥ संभवतीति वाच्यं॥
एवमपि वाच्यत्वस्य कालिकसंबंधेनाभावमादाय लक्षणसमन्वयाव्यधिकरणधर्मावच्छिन्नाभावानावश्यकत्वस्य दुर्वा
रत्वादिति चेन्न॥ विशिष्टसाध्यकेविशिष्टस्यैव परंपरासंबंधेन साध्यत्वमित्यभिप्रायेण प्रथमकल्पकरणात्॥

न चैवं विशिष्टसत्तासाध्यके साध्यतावच्छेदकविशिष्टत्वानिवेशाद्यादृशसंगतिरिति वाच्यं ॥ अथवेति द्वितीयकल्पाभि
प्रायेण तत्संगतेः ॥ यथोक्तधर्मयोरिति ॥ यत्समानाधिकरणसाध्याभावत्वसाध्यसामानाधिकरण्ययोरित्यर्थः ॥ माना
भावादिति ॥ भ्रमतन्ते प्रमेयमित्यादौ प्रमेयत्वादौ भ्रमतद्भिन्नाधेयतावच्छेदकत्वावगाहि प्रमायोऽतिप्रसक्त प्रमेयत्वादौ स्वरूप
संबंधरूपावच्छेदकत्वविषयीकरोत्यतिप्रसक्तसाधारणताद्दशावच्छेदकत्वानिवेशो सत्ताभावाभावो मुच्यत्ववतीति प्रतीतिसिद्धताद
शावच्छेदकत्वमादाय सत्ताभाववान् द्रव्यत्वादित्यादावतिव्याप्तिरतोऽतिप्रसक्त्यादत्तताद्दशावच्छेदकत्वमेव निवेश्यं तथा च ता
द्दशावच्छेदकत्वावगाहियत्समानाधिकरणसाध्याभावो साध्यवतीत्यादिप्रमायाऽभावादसंभवद्वृत्तिभावः ॥ अनिवारिणीति ॥
संयोगी सत्त्वादित्यादौ गुणादृसमवमादायातिव्याप्तिवारणं बोध्यं ॥ वन्यादिसामानाधिकरण्यविरहेपीति ॥ संयोगेन द्रव्य
स्याप्यवृत्तित्वमतेतदावश्यकत्वेपि विषयत्वया ज्ञानाधिकरणे वर्तमानो यस्तु सामान्याभावस्य साध्यसामानाधिकरण्यवि
रहाद्यात्माज्ञानादित्यादावव्याप्तिवारणं तत्प्रयोजनं बोध्यं ॥ वृत्ति द्रव्यं ॥ साध्यसामानाधिकरण्य घटकेहेतु सामानाधिकरण्य
घटके चेत्यर्थः ॥ एकसंबंधेनेति ॥ दैशिकविशेषणताद्यैकसंबंधावच्छिन्नं प्रथमे प्रयोजनमाह ॥ नेनेति ॥ द्वितीये सत्तावान् द्र
व्यत्वादित्यादौ कालिकसंबंधेन हेतुसमानाधिकरणस्य सत्ताभावस्य दैशिकविशेषणतया साध्यसामानाधिकरण्यविर
हाद्व्याप्तिवारणं प्रयोजनं बोध्यं ॥ तत्प्रयोजनं स्फुटमेवेति धूमसमवायिनिष्ठवन्ह्यभावविषयकप्रमायां साध्यवत्ताज्ञान
प्रतिबंधकत्वाभावात् सत्ताद्व्याप्तिवारणरूपमित्यर्थः ॥ स्वाधिकरणवृत्तित्वं निरवच्छिन्नं यावद्यमिति ॥ अथैवं विवक्षणे वन्हि

मानुधर्मादिसादेः कालिकादिसंबंधेन हेतुसमानाधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबंधकत्वाभावात् सत्त्वाद्
॥६२ व्यभिचारवारणाय हेतुमद्वृत्तित्वांशे स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधितानियामकसंबंधस्यैव विवक्षणी
यतया कालिकसंबंधावच्छिन्नप्रतियोगिताके घटत्वाभावाभावे साध्ये घटासमानकालीनक्रियादौ व्यभिचारिणि प्रमेयत्वादौ साध्या
भावस्य हेत्वधिकरणकाले निरवच्छिन्नवृत्तिकत्वविरहेणाव्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः॥ न च हेत्वधिकरणवृत्तित्वं दैशि
कविशेषणतयैव निवेशनीयं भावाभावसाधारणी दैशिकविशेषणता स्वीक्रियत इति नाभावसाध्यकव्यभिचारिण्यतिव्याप्तिः॥ प्र
कृतस्थले तेन संबंधेन घटत्वाभावादेः दैशिकविशेषणतया निरवच्छिन्नवृत्तिकतया कालिकसंबंधेन तद्वत्ताज्ञानस्य तादृशसाध्य
वत्ताज्ञानविरोधित्वान्नातिव्याप्तिरिति वाच्यम्॥ एवं सति तत्साध्यके आत्मत्वे हेतावव्याप्तेः घटत्वाभावरूपस्य साध्याभावस्य दैशि
कविशेषणतया तेन संबंधेनात्मनि वृत्तेः॥ मैवं स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधितानियामकसंबंधेने
ग्रहेऽभावाभाववत्ता वहेत्वधिकरणवृत्तित्वं विवक्षितम् अभाववत्ताज्ञानस्य दैशिकविशेषणतयापि विरोधित्वमिति हेतुघटितेयं ग्रंथकृद्दर्शनीय
मतस्यैवावलंबनादुक्तस्थले दैशिकविशेषणतासंबंधमादायातिव्याप्तिवारणम्॥ एवं च भावाभावसाधारणदैशिकविशेषणता
याअस्वीकारेपि न क्षतिः भावसाध्यके व्यभिचारिणी समवायादेरपि तथात्वात्॥ दशितिसाध्यके आत्मत्वादिहेतुकेऽव्याप्ति
वारणं तु तादृशसंबंधेन हेतुमद्वृत्तितावच्छेदकसाध्याभावत्वविशिष्टविषयकप्रमासामान्यमिति विवक्षया कर्तव्यमिति दिक्॥
न स्सामान्यपरमिति॥ ननु साध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रकारतानिरूपितप्रकारित्वावच्छिन्नप्रतिबध्यतानिवे

शादेवोपपत्तौ सामान्यपदं व्यर्थमिति चेन्न॥ विशिष्टसाध्यतावच्छेदककस्थले तादृशप्रकारकत्वावच्छिन्नप्रतिबध्यताया
अप्रसिद्धेः॥ प्रतिबध्यतायाश्च असाधारण्याय निरूप्यनिरूपकभावापन्नप्रकारकत्वस्यैव तदवच्छेदकत्वस्य वक्तव्यत
याविशिष्टसाध्यतावच्छेदकपर्याप्तावच्छेदकताकप्रकारकत्वस्यो तथात्वात्तादृशप्रकारकत्वविशिष्टज्ञानत्वव्यापकप्र
तिबध्यतायां निवेशनावश्यकत्वेन व्यापकत्वतात्पर्यकत्वस्यादावश्यकत्वात्॥ ज्ञानं चेति॥ ननु सधर्मितावच्छेदकक
यद्धर्मावच्छिन्नसमानाधिकरणसाध्याभावविषयकप्रमासामान्ये स्वसमानधर्मितावच्छेदककसाध्यवत्ताज्ञानासामा
न्यविरोधित्वाभावस्तत्त्वं पर्यवसन्नं॥ निर्धर्मितावच्छेदककसाध्याभावप्रमायाः स्वसमानधर्मितावच्छेदककसाध्यवत्ता
ज्ञानाप्रसिद्धेरतः सधर्मितावच्छेदककत्वस्य तादृशप्रमायां निवेशः॥ तत्र स्वपदं प्रमासामान्यपरं। तत्तत्प्रमापरं
वा॥ आद्ये॥ तादृशप्रमासमानधर्मितावच्छेदककसाध्यवत्ताज्ञानत्वव्यापकप्रतिबध्यतायाः कामिनीजिज्ञासानिरू
पिताया एवाप्रसिद्धेरतिव्याप्तिः॥ अंत्ये॥ घटत्वेन वन्ह्यभाववान् ह्रदश्च वन्ह्यभाववानिति प्रमायाः स्वसमानधर्मि
तावच्छेदककह्रदत्वावच्छिन्नविशेष्यकवन्हिमत्ताज्ञानसामान्यविरोधित्वादव्याप्तिरिति चेन्न। हेतुसमानाधिकरण
साध्याभावांशे सधर्मितावच्छेदककायाया प्रमाप्रसेकं स्वीयहेतुसमानाधिकरणसाध्याभावनिष्ठप्रकारतानिरूपित
विशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितास्वविषयीभूतताभावीयप्रतियोगितावच्छेदकसंबंधावच्छिन्नासाध्य

तावच्छेदकावच्छिन्नप्रकारताशाल्यनाहार्यज्ञानत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकताभाववत्त्वमित्यस्य
॥६५॥ विवक्षितत्वान्न दोषः ॥ एवं यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकः साध्यवत्ताज्ञानप्रतिबंधकताभाववत्त्व
मित्येतादृशार्थकत्वमिति ॥ अत्रेदं चिंत्यं ॥ पूर्वोक्तयुक्त्या लक्षणपरिष्कारावश्यकतया तादृशप्रमात्वव्यापकत्वघटि
तपरिष्कारोऽसंभवदुक्तिकइति ॥ इतिप्रगल्भलक्षणद्वयं ॥ यन्निष्ठतानुपादानइति ॥ यल्लिंगकत्वस्यानुमि
तिविशेषणत्वेऽव्याप्तेर्हेतुनिष्ठत्वलाभः ॥ असंभवोऽव्याप्तिर्वेति ॥ साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेद
कावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशे साध्यप्रकारकव्यभिचारज्ञानस्येव प्रतिबंधकतया संसर्गता
वच्छेदककोटौ भ्रमत्वांगीकारे केवलान्वयीन्यपि तादृशज्ञानप्रसिध्याऽसंभवः ॥ तदस्वीकारेऽव्याप्तिः ॥ वस्तुगत्ये
तिगलत्समानाधिकरणविषयतानिरूपितत्वमेव वस्तुगत्या तद्विशिष्टनिरूपितत्वमित्यर्थः ॥ यन्निष्ठसाध्याभाव
वद्वृत्तित्वविशिष्टविषयितेत्यत्र तादृशवृत्तित्वस्य तादृशवृत्तित्वोपलक्षणत्वे विवक्षायां गुणकर्मान्यत्वोपल
क्षितसत्त्ववत्यगुणादेरिव समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन पदार्थांतरेण वा तादृशवृत्तित्वावगाही
ता ज्ञानीयविषयितायाव्याप्तिर्नसंभवति यतो गुणान्यत्वस्योपलक्षणत्वविवक्षायां सत्तायां गुणे समवायेन वि
शेषणत्वं संयोगगुणान्यत्वस्य सामानाधिकरण्यसंबंधेन तिवत्तादृशवृत्तित्वस्योपलक्षणत्वविवक्षायां विषयि

त्वांशे तादृशवृत्तित्वस्य निरूपितत्वसंबंधेन विशेषणत्वं तादृशवृत्तित्वं च तादृशवृत्तित्वे आश्रयतासंबंधेन विशेष
णमित्यस्यैव वक्तव्यत्वेन तादृशज्ञानीयविषयितो निरूपितत्वसंबंधेन तादृशवृत्तित्वस्य तादृशवृत्तित्वे आश्रयतासं
बंधेन तादृशवृत्तित्वस्य चाबाधात् ॥ गुणाद्यन्यत्वस्य विशेषणत्वविवक्षायां तस्य सत्त्वावच्छिन्ननिरूपितत्वसंबंधेन ध
र्मिपारतंत्र्येणान्वयात्तेन संबंधेन तस्य गुणादौ बाधात् तद्विशिष्टसत्तया गुणादेरिव यन्निष्ठसाध्याभाववद्वृत्तित्वत्वस्य
तादृशवृत्तित्वे विशेषणत्वविवक्षणे तस्य सत्त्वावच्छिन्नसंबंधिताकत्वसंबंधेन धर्मिपारतंत्र्येणान्वयेन वृत्तित्वस्यापि नि
रूपितत्वसंबंधेनान्वयेन तादृशवृत्तित्वावच्छिन्नसंबंधिताकविषयितैव यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टविषयि
तेति शङ्कानुपपत्तेः ॥ उक्तस्य विषयितायां च सत्त्वावच्छिन्नसंबंधिताकत्वसंबंधेन यन्निष्ठसाध्याभाववद्वृत्तित्वत्वस्य बाधा
त्वव्यावृत्तेः ॥ तादृशवृत्तित्वावच्छिन्नसंबंधिता च तादृशवृत्तित्वत्वावच्छिन्नतादृशवृत्तित्वनिष्ठनिरूपकतैवेत्यभिप्रा
येणाह ॥ विशेषणीभूतेति ॥ विशेषणांतरमिसनेन विशेषणविशेषणमपि धर्मिपारतंत्र्येणान्वेतीति सूचितं ॥ व्या
वर्तमानस्य ॥ विशेषितस्य ॥ विशेष्यसंबंधितावच्छेदकत्वभानात् ॥ विशेष्यांशे सत्त्वावच्छिन्नसंबंधिताकत्वसंबंधेन वि
शेषणांशे प्रकारीभूतव्यक्तिभानानियमात् ॥ निरूपकीभूतविषयिताव्यावर्तने निरूपितत्वसंबंधेन तादृशवृत्तित्व
त्वविशिष्टस्य विषयित्वविशेषणत्वे ॥ आश्रयतया ॥ आश्रयतासंबंधेन ॥ व्यावर्तकं ॥ विशेषणं ॥ तस्यापि ॥ तादृश

वृत्तित्वस्याविः॥ निरूपितावच्छेदकभिन्नयद्विषयितायावर्तकत्वात्॥ स्वावच्छिन्नस्य समानाधिकरणनिरूपकताकत्व
॥६५॥ संबंधेन विषयिताविशेषणत्वादि सर्वं॥ वृत्तिविशेषणे तन्निरूपकाधिकरण इति। पर्वतादावितिशेषः॥ वारणा
संभवादिति॥ तादृशविषयितायामधिकरणनिरूपितत्वयन्निष्ठत्वाधयतात्वेतत्त्रितयविशिष्टनिरूपितत्वादिसंनेरि
तिभावः॥ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यविशिष्टस्य व्यधिकरणधर्मावच्छिन्नाभावस्या
प्रसिध्येति॥ ननु वन्हित्वावच्छिन्नवन्हिनिष्ठप्रतियोगिताकत्वेन वन्हित्वेन वन्हिघटोभयाभावावगाहिभ्रमविष
यस्य तादृशसाध्याभावस्य प्रसिध्या तादृशभ्रमीयविषयितामादाय व्याप्तिदुर्वारैवेति॥ तादृशाभाववद्वृ
त्तिधर्म इत्युक्तौ तस्यानुमितिप्रतिबंधकत्वाभावेन प्रतिबंधकत्वस्य तथा रसर्थतादृशाभावीयप्रतियोगिता   चेन्न
वच्छेदकत्वस्योभयत्वसाधारण्यमंगीकृत्य साध्यतावच्छेदमात्रावच्छिन्नसाध्यनिष्ठप्रतियोगिताकत्वसंबंधेन
साध्यतावच्छेदकावच्छिन्नसाध्यमात्रनिष्ठप्रतियोगिताकत्वसंबंधेन वाऽभावांशे साध्यप्रकारकव्यभिचारज्ञा
नस्यैव प्रतिबंधकत्वोपगमस्यावश्यकतया तेन संबंधेन साध्यविशिष्टस्य तादृशभ्रमविषयसाध्याभाव
स्याप्रसिद्धत्वाद्व्याप्त्यनवकाशात्॥ वन्हित्वादिनोभयाभावो तादृशोभयत्वाभावएवेति तस्य साध्यप्रतियो
गिकत्वमेव नास्तीति। केचित्॥ प्रतिबंधकतावच्छेदककोटिप्रवेशादिति॥ साध्याभाववद्वृत्तित्वनिष्ठविषयता

कत्वेन प्रतिबंधकत्वस्य च विषयताविशेषणतया तादृशवृत्तित्वस्यावच्छेदकत्वं संभवति॥ तदेवं न प्रतिबंधकत्व
स्य तादृशवृत्तित्वेन घटावगाहिज्ञानसाधारण्यात् तादृशवृत्तित्वनिष्ठत्वं विहाय साध्याभाववद्वृत्तित्वत्वावच्छिन्न
विषयताकत्वेन प्रतिबंधकतायाः वक्तव्यत्वात् तदवच्छेदककोटौ तादृशवृत्तित्वस्याप्रवेशादिति भावः॥ विषयताप
र्याप्त्यभावविवक्षणादिति॥ अनुमितिप्रतिबंधकतावच्छेदिकायां समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृ
त्तित्वत्वेन हेतुनिष्ठसाध्याभाववद्वृत्तित्वावगाहिज्ञानीयविषयतायां हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टे सत्वा
द्व्याप्तिरतो पर्याप्तिनिवेशस्तथा च प्रतिबंधकतावच्छेदकविषयतायाः समानाधिकरणधर्मावच्छिन्नसाध्या
भाववद्वृत्तित्वत्वहेतुनिष्ठसाध्याभाववद्वृत्तित्वोभयस्मिन्नेव पर्याप्ततया नाव्याप्तिः॥ न च समानाधिकरणधर्माव
च्छिन्नसाध्याभाववद्वृत्तित्वत्वे प्रतिबंधकतावच्छेदिकायां तादृशधर्मीयविषयतानवच्छेदकत्वमेवेति॥ पर्याप्तिवि
वक्षणेऽपि तद्दोषतादवस्थ्यमिति वाच्यं॥ विशिष्टविषयकज्ञाने विशिष्टघटकपदार्थेषु विशेषणविशेष्यभावाप
न्नेषु सर्वेषु तज्ज्ञानीयविषयतात्वेन विषयतापर्याप्तिरस्तीति मतानुसरणात्॥ न च तस्य निर्युक्तिकत्वं शंक्यं
उपलक्षितवत्ताज्ञानविशिष्टवत्ताज्ञानयोर्वैलक्षण्याय उपलक्षितवत्ताज्ञानीयप्रकारतायां केवलविशेषणप
र्याप्तत्वस्य विशिष्टवत्ताज्ञानीयप्रकारतायां विशेषणविशेष्योभयपर्याप्तत्वस्यावश्यं वक्तव्यत्वात्॥ प्रकृता

नुमितित्वसामान्यपरमिति। नन्वनुमितौ साध्याभाववद्वृत्तित्वविषयताश्रयत्वविवक्षयैवोक्तसमूहालंबनवारणा
॥६६॥ त्सामान्यपदं व्यर्थं न च घटत्वेन वन्ह्यभाववद्वृत्तिधूमकालीनपर्वतो वन्हिमानित्यनुमितिनिरूपितायां तादृशा
पर्वतो वन्ह्यभाववानिति बाधज्ञाननिष्ठप्रतिबंधकतातदवच्छेदकत्वस्य हेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयित्व
सत्वादव्याप्तिरतो सामान्यपदोपादानमावश्यकमिति वाच्यं। साध्याभाववद्वृत्तित्वविषयत्वपर्यवसितविषयत्वान्यतर
त्वस्यैव विवक्षितत्वात्। यत्तु यादृशावच्छिन्नतादृशान्यतरविषयताकेनानुमितिर्नान्या तेन तादृशानुमितिप्र
सिद्धुस्तथा निवेशासंभव इति तन्न। तादृशावच्छिन्नस्वीकारे सिद्धांते व्याप्तेर्दुर्वारत्वात्॥ तादृशावच्छिन्नोपस्थिते व
केर्व्यर्थत्वात्। अत्र केचित्। यत्र वन्हिसामान्याभाववद्वृत्तित्वेन धूमावगाहेनानुमितिः प्रसिद्धा तत्र तादृशा
न्यतरविषयिताश्रयानुमितिप्रसिध्यात्वन्मतेऽव्याप्तिः। सिद्धांते हेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयितायां ता
दृशानुमितिप्रतिबंधकतावच्छेदकत्वाभावेन लक्षणसमन्वय इति विशेषवृत्तिसामान्यपदमेव ज्याँ इति वद य
न्ति। वस्तुतस्तु। अनुमितिनिष्ठप्रतिबध्यतायां तादृशान्यतरविषयितानवच्छिन्नत्वदानेन सकलदोषवा
रणे सामान्यपदं व्यर्थमिति प्रतिभाति॥ स्वरूपासिध्यादीति॥ अथ धूमाभाववान्वन्हिरित्यादिस्वरूपासिद्धि
ज्ञाननिष्ठप्रतिबंधकतानिरूपितप्रतिबध्यतायास्तल्लिंगकतत्साध्यकतत्संकानुमितित्वव्यापकत्वेन संभव

त्रिंगताद्दशानुमितित्वस्य द्व्यं वह्निमत्प्रमेयं वह्निमद्रिसाध्यनुमितिसाधारण्यात्तत्र च निरुक्तस्वरूपासिद्धिज्ञानप्रतिबध्य
तायाअभावात् । न चैतल्लिंगकत्वप्रकारकप्रत्यक्षतावच्छेदकावच्छिन्नविशेष्यकपरामर्शविशिष्टमिति वाच्यं । साध्यव्याप्यहे त्व
तुविषयकपरामर्शत्वस्य व्यभिचारज्ञानप्रतिबध्यतावच्छेदकत्वेनैवोपपत्तौ लक्षणे तन्निवेशप्रयोजनाभावात् । धूमा
भाववान्पर्वत इतिज्ञानानंतरमपि वह्निव्याप्यधूमवद्व्यभिसादिपरामर्शाद्व्यं वह्निमद्रिसाध्यनुमितेस्सत्तात्तादृश
परामर्शत्वस्य स्वरूपासिद्धिज्ञानप्रतिबध्यतावच्छेदकत्वाभावादिति चेद् उच्यते चित्त । स्वरूपासिद्धिज्ञानस्य व्याघातेन धर्मि
तावच्छेदकप्रकारकसंशयप्रतिबंधकत्वकल्पनात् प्रतिबध्यतावच्छेदककोटौ तल्लिंगकत्वमात्रस्य निवेशेन प्रतिबध्यताया व्या
पकत्वभंगविरहात् न च व्यभिचारज्ञानप्रतिबध्यतावच्छेदकस्य हेत्वाभासप्रथमलक्षणोक्तरीत्या हेतुधर्मिकव्यभिचार
ज्ञानविशिष्टान्यत्वरूपस्यैव वक्तव्यत्वेन स्वरूपासिद्धिज्ञानप्रतिबध्यतावच्छेदकस्य ततोऽन्यत्वेन च व्यापकत्वभंगो दुर्वार
इति वाच्यं । एकेवङ्गान्वयि निव्यभिचारस्याप्रसिध्द्या प्रकृतलक्षणे तल्लिंगविषयकपरामर्शविशिष्टत्वरूपस्यैव तल्लिंगक
त्वस्य निवेशनीयत्वात् । तन्मात्रविषयकत्वस्यैव तदर्थत्वाच्च न व्यभिचारज्ञानानंतरलिंगद्वयावगाहिपरामर्शजन्यानु
मितौ व्यापकत्वभंगः । इदं च धूमाभाववान्पर्वत इति स्वरूपासिद्धिज्ञानानंतरं धूममात्रलिंगकानुमिसत्त्वसत्तात्तल्लिंगकानुमिति

त्वे व्यापकत्वस्य स्वरूपासिद्धिज्ञानप्रतिबध्यतायां सत्त्वात् संभवदुक्तिं ग्रंथकृदभिप्रायरसाहु ॥ भ्रमस्याप्रामाणिकत्वादिति ॥ हेतुत्वेन
॥६७॥ संसर्गतानभ्युपगमात्तादृशज्ञानस्याननुभूतत्वाद्धा प्रसेकरूपेणभाने प्रकारताभेदादिति भावः ॥ तदभ्युपगमे त्वाह संसर्गीय
विषयताहृद्यानिरूपकत्वेनेति ॥ स्वनिरूपकत्वस्य निरूपकतावच्छेदकप्रकारतात्वावच्छिन्ननिरूपताकस्य च भिन्नसंसर्गतानिरूप
कत्वे तदुभयसंबंधेन यत्किंचित्संसर्गताविशिष्टान्यत्वं तादृशविषयताहृद्यानिरूपकत्वं ॥ उपलक्षणीभूतेनकेनचिदिति
अवच्छेदकत्वप्रमेयत्वादिनेत्यर्थः ॥ अत्र यद्यपि समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियो
गिताकत्वान्यतरसंबंधेन साध्यवैशिष्ट्यनिवेशाच्छंकासंभवति ॥ तथापि समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्य व्य
धिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्य चैकस्याननुगतस्याभावाद्यावंतः स्वसमासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताका
भावास्तावदन्यतमान्यतमान्यतरत्वेनैव संबंधविवक्षणं कर्तव्यं ॥ तत्र च वक्ष्यमाणस्वनिरूपकहेतुसमानाधिकरणे साध्यं च
साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिक इत्यादि विवक्षापेक्षया गौरवमिति तत्सोग इति ध्येयं ॥ निवेशो न संभव
नीति हेतुसमानाधिकरणसाध्यतावच्छेदकविशिष्टनिरूपितविषयिताया अनुमिति प्रतिबंधकतावच्छेदकत्वाभावस्यैव व्या
प्तिनया ज्ञानस्य च प्रतियोग्यविषयकसाध्यतावच्छेदकविशिष्टाभावविषयकतया प्रतियोग्यविषयकविषयकप्रतियोगि
तावच्छेदकविषयकाभाववत्त्वहेतोरप्रसिद्धेस्तादृशव्याप्तिज्ञानेन न संभवतीति भावः ॥ स्वनिरूपकहेतुसमानाधिकरणेति ॥ स्वप्रति

योगिसाध्यनिष्ठस्वावच्छिन्नावच्छेदकतानिरूपितत्वस्वानुयोगिहेतुसमानाधिकरणाभाववनिष्ठत्वैतदुभयसंबंधेन साध्यनिष्ठ
प्रतियोगिताकत्वविशिष्टविषयतानिरूपितत्वेनानुगमो बोध्यः॥ अग्रिमपरिष्कारे यत्किंचिद्धर्मावच्छिन्नप्रतियोगिताकत्वत्ववि
शिष्टसाध्यप्रतियोगिकसंबंधवद्विषयतानिरूपितत्वेन॥ तादृशसंबंधवत्वं च स्वप्रतियोगिनिष्ठावच्छेदकताकत्वस्वानुयोगिहेतु
समानाधिकरणाभाववनिष्ठत्वोभयसंबंधेन तेन वन्हित्वावच्छिन्नप्रतियोगिताकत्वत्वस्य वन्हित्वावच्छिन्नघटवन्हिनिष्ठप्रतियो
गिताकत्वसाधारण्यात् तद्विशिष्टसाध्यप्रतियोगिकत्वे हेतुसमानाधिकरणाभावानुयोगिकत्वयोः सत्वेन वन्हित्वावच्छिन्नप्रतियो
गिताकत्वत्वविशिष्टस्य तादृशज्ञानेयातेन संबंधेन हेतुसमानाधिकरणाभावांशे साध्यस्यभ्रमप्रमादायाव्याप्तिरिति शंकानिरासः॥
साध्यप्रतियोगिकतादृशसंबंधव्यक्तेर्भेदात्॥ निरुक्तोभयविषयितायां निरुक्तोभयसंबंधेन तादृशसंबंधवद्विषयतानिरूपितत्व
विरहात्॥ एतन्मते निरुक्तविषयितानिष्ठानुमितिप्रतिबंधकतावच्छेदकत्वाभावघटितस्यैवानुमितिजनकज्ञानविषयत्वादिति
॥ अयं चास्मदुपगमवादः॥ वस्तुतस्तु॥ अनुमितिसविरोधित्वज्ञानस्यानुमितिहेतुत्वमेव न संभवति॥ तथाहि॥ अनुमितिसविरोधि
त्वं न तल्लिंगकत्वसाध्यकत्वसंसर्गकानुमितिसविरोधित्वं तादृशानुमितिजनकज्ञानाविरोधित्वं वा॥ तत्र तल्लिंगकत्वं न तावव्याप्तिपक्ष
धर्मताविशिष्टतल्लिंगविषयकज्ञानजन्यत्वं व्याप्तेरनिरूपणात्॥ नापि पक्षधर्मताविषयकज्ञानजन्यत्वं क्रमिकाभ्यां भिन्नलिं
स्या गपरामर्शाभ्यां यत्रैकस्य साध्यैऽनुमितिस्तत्र तल्लिंगकत्वसाध्यकानुमितिसामान्यविरोधित्वस्य तादृशानुमितिजनकज्ञानसामान्य

विरोधित्वस्य वाक्यस्मिन्नपि व्यभिचारेऽसत्त्वेन व्यभिचारिण्यतिव्याप्तेः॥ अथ तल्लिङ्गधर्मिकपक्षधर्मताज्ञानाव्यवहितोत्तरत्वविशि-
॥६८॥ ष्टतत्साध्यकतत्संसर्गकानुमितित्वावच्छिन्नजन्यतानिरूपितजनकताश्रयज्ञानसामान्यविरोधित्वं वक्तव्यं तादृशजनकताश्रयत्वं
च न लिङ्गान्तरमात्रपरामर्शस्येति चेन्न हेत्वाभासापसङ्गः॥ यतस्तादृशीजनकता व्याप्तिनिश्चयत्वावच्छिन्नैवेति तादृशजनकज्ञाना-
र्थं जनकतावच्छेदकघटकव्याप्तिज्ञानमपेक्षितं व्याप्तिश्चेन्निरुक्तरूपा तदा तादृशव्याप्तिज्ञाने तादृशज्ञानमपेक्षितमिति विभावनीयं सुधी-
भिः॥ ॥इति विशारदलक्षणं॥ ॥दीधितौ यावन्तः साध्याभावाः प्रत्येकं तत्तत्साजात्यानीया इति। अत्र प्राञ्चः एवं व्याचक्षुः॥ प्रत्येक-
मिति षष्ठीबहुवचनान्तं तथा चैकैकेषां साध्याभावानामित्यर्थः॥ निपातोत्तरमेव भेदार्थकविभक्तेः कल्पनात्तेन तत्तदभावानां प्रातिस्विक-
रूपेण सजातीयानिजापकत्वलाभः॥ तत्तत्सजातीया इत्यत्र तत्ते चत्ते सजातीया इति कर्मधारयाश्रयणात्तत्तदधिकरणवृत्तित्वाभावानां प्राति-
स्विकरूपेण सजातीयानुयोगित्वलाभ इति। तन्न तत्पदस्य पूर्वतनपदोपस्थापितार्थबोधकतायाः स्वरससिद्धाया भङ्गप्रसङ्ग इति
पूर्वतनपदोपस्थापितसाध्याभावावच्छिन्नतद्धेतुनसजातीयपदस्य बहुव्रीहौ तत्पुरुषाश्रयणेन साध्याभावानां प्रतिस्वीकरूपेण
सजातीयप्रतियोगितयाऽन्वयस्यैव युक्तेः॥ न चैवमपि साध्याभावानां यच्छब्दोपस्थापितत्वाभावेनोक्तस्वरसभङ्गस्तुल्य इति वाच्यं॥
यावन्त इत्यत्र यदित्यादेः कल्पनया तदङ्गाभावात् पूर्वोपस्थितबोधकत्वस्वरसस्य भङ्गाभावाच्च॥ प्रत्येकमिति प्रथमाबहुवचनान्तं
तत्तदधिकरणवृत्तित्वाभावा इत्यस्य विशेषणं तत्तेषां प्रातिस्विकरूपेण सजातीयानुयोगिनां लाभः॥ न च प्रत्येकमित्यव्ययीभाव

समासस्यात्र यत्न यालडुत्तरं प्रथमैकवचनमेव साधुत्वार्थं प्रयोगार्हमिति कथं तडुत्तरं बहुवचनमिति वाच्यं॥ नामार्थयोरभेदान्वये
समानवचनत्वस्य तंत्रत्वानुरोधेनैव बहुवचनकल्पनादित्यभिप्रायेण तथैव व्याचष्टे॥ यावत्साध्याभाववत्त्वेन साद्दि। ग्विशेषणमिति सं
त्वेन वृत्त्यधिकरणतायां कश्चिदप्यसत्त्वेनेति॥ नन्वस्मिन् लक्षणे साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकस्यैव साध्याभा
वस्य निवेशनीयतया वन्हिसाध्यके तादृशसंयोगसंबंधावच्छिन्नतत्तद्धूदादिवृत्तितावच्छिन्नप्रतियोगिताकाभाववद्वृत्त्यधिकरणताया
गुणादावेव प्रसिद्धिः संभवतीति तत्र हेतुतावच्छेदकसंयोगसंबंधेन वृत्तेरप्रसिद्धेः व्याप्तिसत्त्वेपि वृत्त्यधिकरणाप्रसिद्धेः कथं तन्निर
भिप्रायमवेति चेदत्र केचित्॥ वन्हिपदस्य वन्हिमत्वप्रकारकप्रमाविषयत्वपरत्वेन स्वरूपसंबंधावच्छिन्नप्रतियोगिताकतादृ
शवृत्त्यधिकरणाप्रसिद्धावेव तात्पर्यं तथापीति॥ यद्यपि निरुक्तरूपं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं न संभवदु
क्तं सर्वस्यैव व्यधिकरणधर्मावच्छिन्नाभावस्य किंचिद्विशिष्टस्वाभाववत्त्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन तद
न्यत्वस्य कस्मिन्नपि व्यधिकरणधर्मावच्छिन्नाऽभावे संभववान्॥ तथापि चकेवतिलक्षणोक्तरीत्या विशिष्टाभावो विशिष्टाधिकर
णत्वाभावरूप एवेति मतानुरोधेनेयमुक्तिरिति ध्येयं॥ वस्तुतस्तु साध्यव्यापकतावच्छेदकरूपावच्छिन्ना यावन्तः प्रतियोगिताः प्रसे
केतत्सजातीयानां तत्तन्निरूपकीभूताभावाधिकरणवृत्तित्वनिष्ठतत्तत्प्रतियोगितानां निरूपकीभूता येऽभावास्तद्वत्त्वं व्याप्तित्व
वेसाजात्य घटकसमानाधिकरणधर्मावच्छिन्नत्वंचासमानाधिकरधर्मावच्छिन्नाया या प्रतियोगिता तदन्यत्वं व्यधिकरणधर्मावि
च्छिन्नत्वंतु स्वसमानाधिकरणधर्मावच्छिन्नाया या प्रतियोगिता तत्तदन्यत्वरूपं वक्तव्यमिति तात्पर्यं॥ समनीयताभावानामनै

कृमत्वे समवायेन तथा प्रमेयत्ववद्भेदस्य निरुक्तव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वविरहेपि व्यधिकरणधर्मावच्छिन्नप्रतियो
॥६१॥ वि गिताकत्वशरीरनिविष्टसमानाधिकरणधर्मावच्छिन्नेसत्त्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्य समानाधिकरणधर्मानिष्ठावच्छे
दकताकत्वस्य विवक्षणात् न विरोधो नैयायिकैः ॥ नो पादेयमिति । एकैकमतसाधारणस्य तद्विशेषणाघटितलक्षणस्य संभवेपि तद्द्वयसाधारण्येन तन्नि
वेशानंभवानंशानां सम्यगेवेति केचिन्नाधूमाभावीयप्रतियोगितायाः प्रमेयमात्रवृत्तित्वेन्यूनवृत्तिधर्मानवच्छिन्नाव्यधिकरणधर्मावच्छिन्नाभा
वीयप्रतियोगित्वेवेतिनादत्राभावमादायातिव्याप्तेराह ॥ अतिरिक्तवृत्तीति । विरुद्धव्यावृत्तमिति । सामानाधिकरण्यघटितमित्यर्थः ॥ व्याप
कताचेति ॥ साध्यवन्निष्ठाभावीयप्रतियोगितेत्यर्थः ॥ समवायेन द्रव्यत्वसाध्यक इति ॥ वन्हिसाध्यके विषयतयाज्ञत्वव्यापकस्य ज्ञान
स्य साध्यतावच्छेदकसंयोगेनाभावस्य केवलान्वयितया समनीयत्ताभावेक्यमते गगनाभावत्वेन तत्साजातीयं तदधिकरणवृत्तित्वस्य
व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वयः ॥ संभवीति तत्साध्यकस्थलसाग ॥ वन्हिमानित्ति ॥ जन्यापुत्तद्युक्तेरेवगुण
साध्यकस्थलांतरानुसरणं ॥ व्यापकतावच्छेदकताघटकसंबंधावच्छिन्नेति ॥ यद्यपि साध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वस्य
प्रतियोगितावच्छेदकतायां निवेशोपि दर्शितनाभावव्यावर्तनं संभवति तथापि पार्थिवत्वादिविशेषितस्येति दीधितिसन्दुरोधात्तसाग ॥
तन्निवेशोऽयोगोलकावृत्तित्वावच्छिन्नाभावस्य लक्षणाघटकत्वात्साध्याभाववव्यक्तिविशेषवृत्तित्वाभावमादायैवातिव्याप्तेः प्रतियोगिता
यां वृत्तित्वव्यापकत्वनिवेशप्रयोजनसंपत्तौ पार्थिवत्वादिविशेषितनिर्धूमवृत्तित्वाभावानुसरणस्य निर्बीजत्वापत्तेः ॥ तादृशा
भावस्य प्रामाणिकत्वेपि लक्षणघटकत्वासंभवादिति । अथेदमनुपपन्नं प्रमेयत्वे संयोगसंबंधघटितव्यापकतावच्छेदकत्वं ॥६१॥

साध्याधिकरणनिरूपितनिरवच्छिन्नाधेयतावद्भावीयप्रतियोगिताधिकरणे संयोगेन विद्यमानं यद्यदवच्छेदकं तदन्यत्वरूपं सं-
योगेन यद्धर्मविशिष्टानधिकरणं साध्यवत्तदन्यत्वरूपं साध्यवद्यत्किंचिद्व्यक्तिसंबंधेन संयोगेन स्वविशिष्टसामान्यकान्यत्वरूपं चारकव्य-
मन्यस्य दुर्वचत्वात्तु त्रिविधमपि प्रमेयत्वे ऽह्लतं प्रमेयत्वं न कस्याप्यपि प्रतियोगितायामधिकरणे संयोगेन विद्यमानं सदवच्छेदकं न
व वा संयोगेन प्रमेयत्वविशिष्टं प्रसिध्यतीति चेन्न। दर्शितद्वितीयविधायां वह्निमान्धूमादित्यादौ ह्रदत्वोभयतावच्छिन्नस्य संयोगेन व्या-
पकतापत्तिस्तादृशोभयत्वविशिष्टस्य संयोगेनाधिकरणाप्रसिद्धेरिति तत्संबंधावच्छिन्नाभावमादायाव्याप्तिवारणाय निरुक्तत्वभिन्न-
त्वे सतीति तत्संबंधावच्छिन्नाधेयतावच्छेदकत्वं वक्तव्यं॥ आधेयतावच्छेदकता च व्यापकतावच्छेदकताघटकसंबंधावच्छिन्ना ग्राह्या अन्यथा
दर्शितोभयत्वस्य कालिकसंबंधावच्छिन्नाधेयतावच्छेदकत्वेन तद्दोषतादवस्थ्यापत्तेः तथा च संयोगेन प्रमेयत्वस्य व्यापकतावच्छेदकत्वं न सं-
भवतीति तस्य संयोगसंबंधावच्छिन्नाधेयतावच्छेदकत्वाभावात्। न च पूर्वमते समवायेन यत्प्रमेयत्ववद्भेदस्यैवैतन्मते दर्शितद्वित्वावच्छिन्ना-
भावस्य समनीयताभावैक्यमते गगनाभावत्वेनाव्याप्तिरिति वाच्यं। गगनादेरैक्यमत एव लक्षणाघटकत्वाभिधानात्। अनैक्यमते सम-
वायेन यत्प्रमेयत्ववद्भेदस्य स्वाधिकरणधर्मावच्छिन्नत्वस्याप्यापादितत्वाच्च। वस्तुतस्तु दर्शितत्रिविधविधासु प्रथमविधायां सा-
ध्यवद्भेदभावीयप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशावश्यकतया द्वितीयविधायां साध्यतावच्छेदकसंबंधेन य-
द्धर्मविशिष्टानधिकरणत्वनिवेशावश्यकतया तृतीयविधायां साध्यतावच्छेदकसंबंधेन साध्यवद्यत्किंचिद्व्यक्तिसंबद्धत्वनिवेशावश्यक-
तया विषयितासंबंधेन सर्वसाध्यकानेयज्ञानत्वहेतुके विषयितासंबंधघटितत्रिविधस्यापि व्यापकतावच्छेदकत्वस्याप्रसिध्या सा

ध्यवन्हि ष्ठाभावीयप्रतियोगितासामान्ये यद्धर्मसामानाधिकरण्यविशिष्टयद्धर्मावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नोभया
भाववत्त्वरूपमेव साध्यव्यापकतावच्छेदकत्वं वक्तव्यं यद्धर्मसामानाधिकरण्यघटकयद्धर्माधिकरणत्वं व्यापकतावच्छेदकताघटकसंबं
॥७०॥ धेन तथा चैतादृशसंयोगसंबंधेन व्यापकतावच्छेदकत्वं न प्रमेयत्वस्येत्यवधेयं। लक्षणघटकतयेति। कपिसंयोगाभावस्य केवलान्वयि
त्वेपि न तस्य समनीयताभावेव्यमते गगनाभावत्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं प्रतियोगिवैयधिकरण्याघटितं
समनैयत्यघटकव्यापकत्वांशे तयोरवैक्यादित्यवधेयं॥ सत्तासाध्यकाव्याप्तिवारकहेतुतावच्छेदकसंबंधेन कस्यचिदधिकरणव
र्तमानत्वविशेषणे स्वरूपसंबंधेन वर्तमानत्वविवक्षणे ताहृ॥ कपिसंयोगाधिकरणत्वाभावेति॥ आत्मत्वहेतावव्याप्तिरिति। सा
ध्याभाववत्तायां दैशिकविशेषणतासंबंधावच्छिन्नत्वनिवेशाभिप्रायेणेदं यदि साध्याभाववद्वृत्तिश्च्याधिकरणत्वं निवेश्यते स्वप्र
तियोगितावच्छेदकविशिष्टस्वप्रतियोगिमत्तायत्रविरोधिता नियामकसंबंधेन वा तदधिकरणत्वं निवेश्यते तदानायं दोषः॥ रूपान्य
त्वविशिष्टगुणत्वसाध्यके यावत्साध्याभावोक्तः पानिरूपासमवेतत्वावच्छिन्नाभावस्यारूपे प्रतियोगिवैयधिकरण्यसंभवान्नातिव्याप्तिसो
भावा रतो एतद्रूपान्यत्वेति॥ आकाशत्वाभावे साध्य इति॥ आकाशाभावस्य कालिकसंबंधेन व्याप्यवृत्तित्वानेन तदभावस्य कालिकीमव
च्छेदनाप्यसत्त्वेन प्रतियोगिवैयधिकरण्यनिरूपकाप्रसिद्धिरिति कालिकसंबंधावच्छिन्नाकाशाभावाभावसाध्यकस्थले परिशेषः॥
च्चाकाशावच्छेदेनेति॥ आकाशस्यापि स्वरूपसंबंधेन महाकालवृत्तित्वात् दवच्छेदाधिकरणसंबंधित्वमाकाशस्याक्षतमित्यध्येयं॥ ज
न्यज्ञानविषयत्वसाध्यक इति॥ यद्यपि विषयतयाजन्यज्ञानसाध्यकेप्यव्याप्तिः संभवति तथापि साध्यतावच्छेदकसंबंधावच्छिन्ना

भावस्यैतन्मते निवेशाद्विषयतायाहस्यगनेयामकतामते तत्संबंधावच्छिन्नाभावाप्रसिद्धेस्तेन संबंधेन साध्यतानभ्युपगमाभिप्रा
येण तु सागः ॥ एतद्रूपान्यत्वविशिष्टसत्तावानिति ॥ अत्रापि रूपान्यत्वप्रयोजनं पूर्ववदेव । प्रतियोग्यप्रसिद्ध्येति ॥ यद्यपि
सत्तमनीयताभावैक्यमतेन तत्प्रसिद्धिः संभवति तथापि तदनधिकरणाप्रसिद्धिर्दुर्वारा ॥ अथवा यादृशप्रतियोगितेत्यविवक्ष
णावच्छेदकत्वान्नासंगतिः ॥ स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणाद्वृत्ति ॥ व्यधिकरणधर्माव
च्छिन्नाभावस्य स्वप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वात्तत्संग्रहाय स्वप्रतियोगीति ॥ तादृशासमानाधिकरण्यमव्याप्यवृ
त्ति संयोगाभावादौ प्रसिद्धमिति स्वपदेन तं गृहीत्वा तदन्यत्वं तत्क्षणघटकाभावे उपपादनीयं ॥ भवानंदोक्तदूषणमाशंक्य निराकुरु
ते ॥ न च तथाप्येतदभावविशिष्टमिति ॥ साध्यप्रतियोगिनः सप्तमपदार्थत्वस्फोरणायैतदिति केचित्तु ॥ असंभवस्यैव प्रसंगादिति
॥ अत्र केचिद्वह्निमान्गगनादित्यसद्वृत्तिहेतोर्व्यापकत्वमताभिप्रायेण दीधितिकारीयाव्याप्त्यभिधानसंगतिमाहुः ॥ तथा चेति ॥
अथायं निष्कर्षोनि संभवति तादात्म्यसंबंधेन प्रमेयसाध्यके छन्नस्य घटकत्वेनाभिमतसमवायित्वत्ववाच्यत्वत्वादिना प्रमे
यत्ववच्छेदकस्य प्रतियोगितावच्छेदकतावच्छेदकसमवायित्ववाच्यत्वत्वादौ साध्यतावच्छेदकतादात्म्यसंबंधघटितव्यापकतावच्छे
दकत्वाभावादत्र भ्रमः ॥ समवायित्वावच्छिन्नप्रमेयत्वनिष्ठावच्छेदकताकप्रमेयत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेद
स्याभ्युपगमात्तादृशाभेदप्रतियोगितावच्छेदकतावच्छेदकप्रमेयत्वादौ साध्यव्यापकतावच्छेदकत्वसत्त्वात्तादृशाभेदमादायै
वतत्क्षणसमन्वयः ॥ न च तादृशाभेदस्वीकारे कपिसंयोगाभाववान्नेयत्वादित्यादौ घटत्वावच्छिन्नायाः कपिसंयोगाभाव

व्यापकत्वविशेषणवैयर्थ्यापत्तेस्तदुपेक्षा गतत्तन्निवेशे साध्याभावसामानाधिकरण्यमात्रनिवेशे धूमाभावसमानाधिकरणवन्ह्यभावमा
दायधूमवान्वन्हेरित्यादावतिप्रसंगो वाच्यः स च न न संभवति प्रतियोगितावच्छेदकसंबंधेन व्यापकत्वकल्पेऽयोगोलकान्यत्वाभावस्यापि वि
।।७२।। क्षणघटत्वात्।। साध्यतावच्छेदकसंबंधेन तन्निवेशे च तस्यात्तथात्वादयोगोलकावृत्तेरभावस्य लक्षणघटकत्वेपि संयोगसंबंधावच्छिन्नप्रति
योगिताकत्वादृशाभावस्य गुणादावपि सत्वात्तदृतरभावेणैव वन्ह्यभावस्य धूमाभावसामानाधिकरण्यसंभवतीति ध्येयं।। अनवच्छिन्नदे
शिकविशेषणसंबंधेन व्यापकत्वं नाभाधेयेवेति इदमत्र चिंत्यमेवं सति कवृत्तादौ साध्ये प्रमेयमिति साकारके जन्यज्ञानस्य हेतुनायांताद
शहेत्वभावस्य व्यापकतापत्तिस्तदीयमनिरवच्छिन्नदेशिकविशेषणताया अप्रसिध्यायत्त्वेरेनतव्योपाशानासंभवान्निरवच्छिन्नदे
शिकविशेषणसंबंधसामान्येयात्प्रतियोगिकत्वसाध्याभाववद्वृत्तिः किंचिव्यक्त्यनुयोगिकत्वोभयाभावस्तदन्यत्वमेव वा निरवच्छिन्नदेशि
कविशेषणसंबंधेन साध्याभावव्यापकत्वमिति विवक्षणाव ह्यपकत्वयाअभावस्येतिभावभिन्नस्येसर्थकमितिसनेन विवक्षितं भाव
भिन्नत्वं व्यर्थमिति।। क्रियामात्रस्यैव कालोपाधित्वमते धूमवान्वन्हेरित्यादावतिव्याप्यभावान्महाकालभिन्नः कालत्वादिति।। स्वयम्य स
मिति।। ज्ञानवान्द्रव्यत्वादित्यादौ विषयितया द्रव्यत्वत्वविशिष्टज्ञानाभावस्य साध्याभावव्यापकत्वया तमादायातिव्याप्तेर्वारणाय प्रतियोगि
तावच्छेदकतायां हेतुतावच्छेदकताघटकसंबंधावच्छिन्नत्वमप्यमान्माज्ञानादित्यादौ विषयतया हेतौ साध्याभावव्यापकात्मत्वाभावप्रतियोगि
तावच्छेदकात्मत्वत्वस्य विषयितासंबंधेन हेतुव्यापकतावच्छेदकत्वादिति व्याप्तिव्यपरिणाम्यव्यापकतावच्छेदकतायां हेतुतावच्छेदकताघटक
संबंधावच्छिन्नत्वं निवेशनीयं।। एवं यद्रूपवत्वं हेतुतावच्छेदकताघटकसंबंधेन यद्रूपावच्छिन्नत्वं हेतुतावच्छेदकसंबंधेन निवेशनी व

यं तत्प्रयोजनं स्फुटमेवेत्यस्मिन्नर्थः ॥ हेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्धेरिति ॥ विषयितासंबंधस्याभावप्रतियोगितानवच्छेदकत्वाभि-
प्रायेणेदं ॥ अन्यथा विषयितासंबंधावच्छिन्नप्रतियोगितायां लक्ष्यावच्छिन्नत्वसत्वादप्रसिद्धेरसंगतं स्यात् ॥ विषयितासंबंधस्याभाव-
प्रतियोगितावच्छेदकत्वेन तु व्यापकीभूताभावप्रतियोगितायामुभयसत्वेन गुरुधर्मावच्छिन्नहेतुकस्थले व्याप्तिरिष्टैव ॥ अप्रतीकारादि-
ति ॥ ननु हेतुतावच्छेदकानवच्छिन्नत्वमित्यनेन हेतुतावच्छेदकव्यापकधर्मानवच्छिन्नत्वं निवेश्य न कंबुग्रीवादिमत्वावच्छिन्नहेतुकव्याप्ति-
प्रतीकारः संभवतीति चेन्न ॥ तथा सति द्रव्यं सत्वादित्यादावतिव्याप्तेः ॥ द्रव्यत्वाभावव्यापकविशिष्टसत्ताभावप्रतियोगितायां सत्ता-
त्वव्यापकविशिष्टसत्तात्वावच्छिन्नत्वसत्वेनोभयाभावसत्वात् ॥ यदि च हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नत्वमेव
निवेश्यं विशिष्टसत्तात्वस्य सत्तात्वावच्छिन्नव्यापकतावच्छेदकत्वाभावान्नातिव्याप्तिरित्युच्यते तदा सिद्धान्त एव पर्यवसानमिति
ध्येयं ॥ ॥ इति मिश्रलक्षणानि ॥ ॥ वृत्तिमद्वृत्तित्वद्वयस्य च हेतुतावच्छेदकसंबंधेन वृत्तिमत्वनिवेशमात्रस्य प्रयोजनं दीधी-
तिकृता दर्शितं न तु वृत्तिमद्वृत्तित्वविशेषणस्येत्यतो स्वयं तत्प्रयोजनं दर्शयति ॥ वृत्तिमद्वृत्तित्वानुपादान इति ॥ जगत्संबद्धत्वस्ये-
ति ॥ स्वपदवृत्तिपदस्य संबद्धत्वमित्यर्थकरणात्तदनुरोधेनेयमुक्तिः ॥ नानाव्यक्तिसाध्यकेति ॥ नन्वेकव्यक्तिसाध्यके एतद्रूपवा-
नेतद्धूमादित्यादावप्येतद्रूपभिन्नत्वेनैतद्रूपतद्रूपान्यतराभावमादाय व्याप्तिसंभवेन नानाव्यक्तीत्यसंगतमिति चेन्न ॥ वह्नित्वेन
वह्निघटान्यतराभावमादायाव्याप्तेर्वारणाय स्वान्यूनवृत्तिधर्मानवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वावश्यकत्वेन ताद्रूप्या-
भावस्य लक्षणाघटकत्वात् ॥ यद्वा साध्यमात्रप्रतियोगिताकाभावनिवेशेनैकव्यक्तिसाध्यकेऽव्याप्तिरिति नानाव्यक्तिसत्त्वमिति ॥

ध्यकेऽपि नाव्याप्तिस्तादृशसाध्याभाववद्घटनिरूपिततादात्म्यसंबंधावच्छिन्नवृत्तित्वे घटतादात्म्यरूपे घटावृत्तित्वस्याभावात्॥ मै
॥२४॥ वं घटनिरूपिततादात्म्यस्वरूपान्यतरसंबंधावच्छिन्नवृत्तित्वस्यैव साध्यतायां घटस्य तादृशसाध्याभाववत्त्वाभावात्॥ अथ साध्या
भाववद्वृत्तित्वमात्रनिष्ठत्वेन धर्मविशेषणत्वे नायं दोषो घटावृत्तित्वस्य तन्मात्रनिष्ठत्वाभावात्॥ तादृशवृत्तित्वमात्रनिष्ठत्वं च तादृश
वृत्तित्वत्वव्याप्यत्वं न तु तदितरावृत्तित्वं विषयितासंबंधेन हेतुके तत्संबंधावच्छिन्नवृत्तित्वस्य विषयतारूपतया विषयतायाश्च वि
षयरूपत्वनतदितराप्रसिद्धेरिति चेन्न॥ तत्तत्साध्याभाववद्वृत्तित्वत्वसमनीयतत्संबंधमग्निवेश्य तदवच्छिन्नत्वस्य प्रतियोगितायां नि
वेशापेक्षया प्रतियोगितायां तत्तत्साध्याभाववद्वृत्तित्वत्वसमनैयत्यसंनिवेशस्यौचित्यात्॥ विषयितासंबंधेन हेतुतायां साध्याभा
ववद्वृत्तित्वत्वस्य जगद्विषयतात्वरूपतया विषयताया विषयस्वरूपत्वेन तत्समनीयतद्धर्मावच्छिन्नप्रतियोगिताकाभावाप्रसि
द्धेश्च॥ एतेन हृदवृत्तित्वत्वेन निर्धूमवृत्तित्वसामान्याभावीयप्रतियोगितायां निर्धूमवृत्तित्वसामान्येऽस्वीकारे धर्मे समनैयत्यसंनिवे
श एवोचितोऽन्यथा तादृशाभावाभावरायातिव्याप्तेर्दुर्वीरत्वेनेति निरस्तं॥ अनेनैव दोषेण कल्पांतरस्यावतरणीयत्वाच्च॥ साध्या
भाववद्वृत्तेरिति॥ स्वनिष्ठमुख्यविशेष्यताशून्यप्रतीतिवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्वरूपे
सर्थः॥ तत्तदीति॥ यद्यपि तत्तद्व्यक्तित्वेनाभावनिवेशे संयोगादिसंबंधावच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावसाध्यके
म गगनाद्यात्मकसाध्याभावाधिकरणाप्रसिद्धेः॥ तथापि साध्याभावत्वरूपायावसोऽनुयोगिता प्रसिद्धा तत्तद्वह्न्यधिकरण
वृत्तित्वाभावायावं तद्वृत्तिनिवेशान्न दोषः॥ अनुयोगित्वप्रतियोगित्वयोरनुयोगिप्रतियोगिस्वरूपत्वमते तु व्यापकता

के

वच्छेदकत्वं तस्य परिचायकतया तत्त्वरिचित्तत्तद्धर्मावच्छिन्नतत्तन्निष्ठतत्तत्संबंधावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाधिकरणवृत्तित्वा
भावा एव निवेश्याः॥ नानाविपक्षकेऽप्रसिद्धिरिति॥ नन्वेकविपक्षेपि तद्घटभिन्नं पटत्वादिसाध्यके तद्घटवृत्तित्वाभावीयप्रतियोगिताया
स्तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकत्वेपि तत्तत्साध्याभावानां पार्थक्ये व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वत्वव्यापकत्वविरहात्समनैय्य
साप्रसिद्धिरस्तीति नानाविपक्षे सव्यावर्त्तकमिति चेन्न॥ व्याप्यत्वाप्रसिद्धिप्रयोज्यायाः समनैयत्याप्रसिद्धेरेव विवक्षितत्वात्॥ अत्र
न एव व्याप्येकप्रतियोगिताया अप्रसिद्धेरिति ग्रंथकृदुक्तिः॥ न चैवमप्येकविपक्षके व्यापकत्वाप्रसिद्धिप्रयोज्यसमनैयत्याप्रसि
द्ध्यनभिधानेन न्यूनता दुर्वारेति वाच्यं॥ यत्किंचित्साध्याभाववद्वृत्तित्वत्वव्यापकत्वनिवेशो नाप्रसिद्धिरित्यभिप्रायात्॥ यत्किंचित्प्र
तियोगितेति॥ व्यधिकरणधर्मावच्छिन्नप्रतियोगितेत्यर्थः॥ अतिव्यापकतयेति॥ व्यभिचारिहेतुसाधारणतयेत्यर्थः॥ तथाचा
तिव्याप्तिरिति भावः॥ घटभेदादाविति॥ नन्वत्र वृत्तित्वत्वावच्छिन्नाभावस्य लक्षणाघटकत्वेपि नातिव्याप्तिर्व्यधिकरणधर्मावच्छिन्नसा
ध्याभाववद्वृत्तित्वाभावस्यापि लक्षणाघटकत्वात्॥ व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावः
च्छेदकत्वापेक्षया वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्यैव लघुत्वेन तद्वदवच्छिन्नभेदकूटव्यापकत्वस्य तादृशाभावी
यप्रतियोगितायामसंभवात्॥ न च घटभेदसाध्यके तादृशाभावाप्रसिद्ध्याऽव्याप्तिरेव विवक्षितेति वाच्यं॥ केवलान्वयिनि वह्नि
मान्धूमादित्यादौ च सर्वत्राप्रसिद्धिसंभवे तदुपेक्षाया निर्बीजत्वात्॥ अत्र केचित्॥ वृत्तित्वांशो व्यधिकरणधर्मावच्छिन्नाभाववद्वृ
त्तित्वस्योपलक्षणतया घटत्वेन जगद्वृत्तित्वाभावमादाय सद्धेतौ सर्वत्र लक्षणसमन्वयेन घटभेदसाध्यकेऽतिव्याप्तिरेव वि

वर्त्तिसिनेसाद्धुः॥ तद्दवच्छिन्नैकभेदनिवेशासंभवादिति॥ अथैवमपि विषयितासंबंधेन हेतुतायामापि तत्तद्व्यधिकरणधर्मावच्छि-
॥७५॥ न्नसाध्याभाववद्वृत्तित्वस्य तादृशाभाववद्वृत्तित्वनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगिताया पकत्वासंभवात्॥ तथाहि तादृश-
प्रतियोगित्वविषयतात्वयोः समनैयत्येन विषयतानिष्ठभेदप्रतियोगितावच्छेदकत्वापेक्षया प्रतियोगितासमानाधिकरण-
भेदप्रतियोगितावच्छेदकत्वस्य गुरुत्वेन प्रतियोगितानवच्छेदकतया तदवच्छिन्नभेदरूपव्यापकत्वाप्रसिद्धेः॥ न च तत्रापि प्रतियो-
गितासमानाधिकरणभेदप्रतियोगितावच्छेदकभेदकूटमेव निवेश्यमिति वाच्यं॥ तथा सति वह्निमान्धूमादित्यादौ यत्वादि साध्यो
भयत्वेपत्व निष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य लघ्व्यक्तित्वेन योऽभावस्तदीयप्रतियोगिता यास्तादृशावृत्तित्वनि
ष्ठत्वव्यक्तित्वापेक्षया गुरुत्वेन तादृशसाध्याभाववद्वृत्तित्वनिष्ठभेदप्रतियोगितावच्छेदकयत्किंचित्त्वेन तादृशसाध्याभाववद्वृत्तित्व
त्वे तादृशभेदकूटात्मकतव्यापकत्वसत्वेन च तादृशप्रतियोगिताकाभावस्यापि लक्षणघटकतयाऽसंभवापत्तेः॥ न च भेदप्रति
योगितावच्छेदकत्वमपि प्रतियोगिताविशेषणं दातुं शक्यं तथा सति विषयितासंबंधेन हेतुतायां जगद्विषयतात्वस्य व्यधिकरण
धर्मावच्छिन्नसाध्याभाववद्वृत्तित्वसमनीयत प्रतियोगितायास्तादृशाविषयत्वनिष्ठाया विषयतायाविषयस्वरूपत्वमते केवला
न्वयितया भेदप्रतियोगितावच्छेदकत्वाभावेन तादृशप्रतियोगितायाअप्रसिद्ध्याऽव्याप्त्यापत्तेरिति चेन्न॥ प्रतियोगितायाअखंड
त्वमते नैतदभिधानात्तन्मतेन तस्याः स्वरूपतएवावच्छेदकत्वान्नोक्तदोषः॥ यदि चाभावधर्मो विशेषणाविधयान निवेश्यतेऽपि
त्वभावप्रत्यतिरेवेति॥ अयमर्थः॥ प्रकृतनिरुक्तौ साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावत्वनिष्ठावच्छेदकतानिरू

पकीभूतायाऽभावनिष्ठावच्छेदकतात्वन्निरूपकीभूतायाऽधिकरणनिष्ठावच्छेदकतातन्निरूपकीभूतायानिरूपितत्वनिष्ठा
वच्छेदकतातन्निरूपकीभूतायावृत्तित्वत्वनिरूपकतातन्निरूपितस्यनिरूप्यत्वस्य योऽभावस्तत्त्वेन तत्तत्साध्याभाववद्वृत्तित्वत्वनिरूपितत्वाभा
वस्य न प्रवेशः॥ अपितु साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकता
निरूपके सादिक्रमेणैव॥ एवं च घटवृत्तित्वनिरूपितत्वं नास्तीति धीसिद्धाभावस्य निरुक्तविशेषणाक्रान्तस्य घटवृत्तित्वत्वावच्छिन्नप्रति
योगिताया मसत्वान्नतादृशाभावस्यलक्षणघटकत्वानुपपत्तिः॥ तत्र चाभावनिष्ठावच्छेदकतायां किंचिन्निष्ठावच्छेदकतान्निरूपितत्वरूपम
नवच्छिन्नत्वं न निवेशपनेयेन निर्धर्मवृत्तित्वत्वनीरूपितत्वं नास्तीति धीसिद्धाभावस्य निरुक्तविशेषणाक्रान्तत्वं न स्यात्॥ तत्तद्भाववद्वृत्ति
त्वत्वनिरूपितत्वत्वपर्याप्तावच्छेदकताकाभावस्यैव निवेशनीयतादीति॥ अथ वा तत्तद्भावत्वस्योपलक्षणत्वं विशेषणत्वं वो विवक्षितं॥ आद्ये
धूमाद्यभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकनिरूपितत्वनिष्ठावच्छेदकतावृत्तित्वत्वनिष्ठनिरूपकतात्वत्वपर्या
प्तप्रतियोगितावच्छेदकताकाभावत्वेनैव निवेश इति पर्यवसितं तथा च धूमाभावत्वावच्छिन्नत्वाविशेषितावच्छेदकताघटितं यद्धूमाभाववत्वविशिष्टा
धिकरणवृत्तित्वत्वनिरूपितत्वत्वं तत्पर्याप्तावच्छेदकताकप्रतियोगिताकाभावस्य संग्रहो दुर्घटः॥ द्वितीये तस्यासंग्रहेपि नष्टनिर्धूमाभाववन्निष्ठा
वच्छेदकताघटितं यद्धूमाभावत्वोपलक्षिताधिकरणनिरूपितवृत्तित्वत्वनिरूपितत्वत्वं तत्पर्याप्तप्रतियोगितावच्छेदकताकाभावमादायैव वन्नि
दा धूमवृत्तित्वाभावस्य लक्षणघटकत्वोपपत्तिरिति स्फुट्याते॥ तत्तद्भावत्वेन निवेशो व्यर्थो गौरवग्रस्तश्च॥ साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्र
तियोगिताकाभावत्वेनानुगतेनोपलक्षणीभूतेन न निवेशासंभवात्तथा निवेशे धूमाभावत्वेन धूमाभावघटितविशिष्टनिरूपितत्वत्वावच्छिन्नाभाव

स्यात्संग्रहेपि धूमव्यापकतावच्छेदकरूपावच्छिन्नाभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकनिरूपितत्वनिष्ठावच्छे
॥७६॥ दकतानिरूपितवृत्तित्वसंनिष्टनिरूपकताकत्वं नास्तीति धीविषयाभावमादायैव निर्धूमे वृत्तित्वाभावघटवृत्तित्वाभावादेर्लक्षणघटकत्व
संभवात्॥ अंशे घटभिन्नत्वप्रमेयत्वादिसाद्यावत्तिव्याप्तीरिति चेन्न॥ साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावत्वेनोपलक्षणेन साध्याभावनि
वेशानएवेत्यग्रथकृतात्पर्यकल्पनात्॥ तादृशानियमे मानाभावादिति॥ गोत्वादिप्रकारितानिप्रकारकज्ञानानुव्यवसायेप्रकारितांशेस्वरूप
त्तएव गोत्वादेः प्रकारतया तादृशानीयमे व्यभिचारात् समवायनिरूपितत्वाभ्यामतिरिक्तसंबंधेन जातेः स्वरूपतो न भानमित्येवंरूप
नियमस्यैव स्वीकारात्समवाये नैवेत्यादिनियमे मानाभावादित्यभावः॥ जातिसाधारणेति॥ घटत्वत्वपटत्वत्वहेतौ घटत्वपटत्वादि
वृत्तित्वाभावाभावात्॥ साधारणपदोपादाने नेदं वाच्यं ज्ञेयत्वादिसाद्याव्यापि॥ जातेः समवायेनैवेत्यादिनियमांगीकर्तृमते पूर्वोक्तसक
लदोषाद्धारादभावप्रभेति विशेषणत्वविवक्षाकल्पे दोषमाहेवमिति॥ गगनध्वंसाधिकरणहत्वितिति॥ कपालघटादिसाद्याविषयर्थः॥ संयो
गेन वृत्तिमत्ते तादृशध्वंसवत्वनियमेन तादृशाभावस्य वृत्तिमद्वृत्तित्वाभावादतो संयोगेन धूमस्य हेतुत्वपरिसागः॥ अव्यापकतया॥ अ
वृत्तितया॥ तथाच तादृशाभावस्य समवायेन वृत्तिमति रूपादावसत्वादव्याप्तिरितिभावः॥ स्वस्मिन्नेव॥ जात्यादावेव॥ एतेन जातेर्घ
टादौ समवायेन सत्वात्समवायावच्छिन्नविषयताभावस्य घटवृत्तित्वे कथं तान्निरस्तम्॥ कालेति॥ कालपदं क्रियापरं तथाच वह्निमा
न्क्रियांतः प्रात्मज्ञानादिसाद्याविषयर्थः॥ गगनभेदसाध्यकघटत्वोदौ लक्षणसमन्वयान्नासंभवः॥ येन संबंधेन यद्वर्तनेइति॥ सा
ध्याभाववद्वृत्तित्वत्वनिष्ठस्वरूपसंबंधावच्छिन्नावच्छेदकताभिन्नसमानाधिकरणसंबंधावच्छेदकताभिन्नसामानाधिकरणसंबंधावच्छि

न्यावच्छेदकत्वान्निरूपकत्वं प्रतियोगितायां पर्यवसितं ॥ तद्धर्मवत्त्वाविषयकप्रतीतिवृत्तीति ॥ इदमत्र विचार्यं । स्वाविषयकप्रतीतिवृत्ति साध्या
भाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयितात्वरूपा घटकत्वशरीरे साध्याभाववान्केन रूपेण निवेश्यः ॥ न तावत्तत्तद्व्यक्तित्वेन साध्यव्या
पकतावच्छेदकरूपावच्छिन्नप्रतियोगितानिरूपिताया अनुयोगिताव्यक्तयःप्रसक्तेः तत्तद्व्यक्तिपुरस्कारेण वा भूतलत्वमूर्त्तत्वोभयाभाववान्
भूतलत्वविशिष्टमूर्त्तत्वाभाववान् वा मनस्त्वादिसादौ तत्तद्व्यक्तित्वेन तादृशोभयाभावादिनिष्ठप्रतियोगितानिरूपितानुयोगिताविशेषेण
वा विशेषित तत्तत्साध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयितायाः स्वरूपतो मूर्त्तत्वरूपजातिघटितमूर्त्तवृत्तित्वताविष
यकप्रतीतिवृत्तित्वविरहेण स्वपदेन तादृशमूर्त्तवृत्तित्वत्वस्योपादानासंभवेन तस्या घटकत्वाभावोद्घटकधर्मानवच्छिन्नप्रतियोगि
ताकमूर्त्तवृत्तित्वत्वावच्छिन्नाभावस्य गगणपरिमाणादौ वृत्तिमद्वृत्तेर्मनिस्वरूपहेत्वावभावेनाव्याप्तेः ॥ अथ तादृशानुयोगिताव्यक्त्य
वच्छिन्ननिरूपकताकाधिकरणवृत्तित्वत्वाघटकत्वमेव निवेशनीयम् नो स्वरूपतो मूर्त्तत्वघटितमूर्त्तवृत्तित्वत्वस्य तादृशावृत्तित्वत्वाघ
टकत्वनिर्वाहात्तदवच्छिन्नाभावस्य लक्षणघटकत्वेनोक्ताव्याप्त्यनवकाशादिति चेन्न हि भूतलत्वमूर्त्तत्वोभयाभाववसाध्यके घटभेदसाध्यके च
मेयत्वादावतिव्याप्त्यापत्तिर्दुर्वारा स्यन्नविद्वृत्तित्वत्वघटवृत्तित्वत्वादेस्तादृशानुयोगिताव्यक्त्यवच्छिन्ननिरूपकताकाधिकरणवृत्तित्वत्वा
घटकत्वेन तादृशावृत्तित्वत्वस्य स्यत्रचिवृत्तित्वतापेक्षया गुरुत्वेनाभावप्रतियोगितानवच्छेदकतया व्यधिकरणधर्मावच्छिन्नाभावस्यैव
लक्षणघटकत्वादिति ॥ किंतु तदन्यदोषाणामेवावानवकाशादिति ॥ अत्र केचित्पूर्वपक्षयंति ॥ अस्मिन्लक्षणेपि साध्याभाववेया
चत्वस्य पर्वमुक्तत्वात्सत्तावान् जातेरित्यादौ यावदंतर्गतसत्तासामान्याभाववन्निरूपितसमवायेन वृत्त्यप्रसिध्याव्याप्तेः कूटघटितलक्ष

धा णादेवत्रापि सत्त्वेन तदन्यदोषाणामत्रानवकाशाद् इत्यसंगतत्वं ॥ अत्रेदं समाधेयं बोध्यं ॥ तत्तत्साध्याभाववद्वृत्तित्वलक्षणीयतत्प्रतियो
॥७७॥ गिताकाभावनिवेशकल्पे साध्याभावे यावत्त्वविशेषणावश्यकत्वेपि यद्धि चाभावधर्मेति विशेषणतया न निवेश्यत इति प्रतिपादि
तपूर्वकल्पे तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावनिवेशपक्षीयथेन संबंधे
न यद्वृत्तित्व इति निष्कृष्टार्थे साध्याभावे यावत्त्वानिवेशेपि क्षतिविरहात्ताद्दशपक्षाभिप्रायेण तदन्यदोषाणामत्रानवकाशाद् इत्यु
क्तेः संगमनीयेति ॥ ॥ इति कूटाघटितलक्षणं ॥ शेषदलं इति ॥ साध्याभावसमुदायवद्वृत्तित्वव्यापकत्वदलं इत्यर्थः ॥
तथा चेति ॥ पूर्वदलानुपादाने चेत्यर्थः ॥ अतिव्याप्तिरिसाद्याये नेति ॥ ननु पूर्वदलानुपादानेपि नातिव्याप्तिसंभवः धूमभे
दजगत्संयुक्तत्वोभयाभावस्य शेषदलाक्रांतस्य धर्मादौ वृत्तिमद्वृत्तेर्वन्ह्यो वभावात् ॥ न च घटवृत्तित्वघटान्यवृत्तित्वोभया
भावमादाय वाच्यं शेयत्वादिसाध्यकव्याप्ते वरिणा यप्रतियोगितायां स्वरूपवृत्तिधर्मानवच्छिन्नत्वविशेषणस्यावश्यकतया न तस्य
लक्षणघटकत्वमिति वाच्यं ॥ एवमपि वन्हिवृत्तित्वेन जगद्वृत्तित्वाभावस्य ताद्दशस्य हेतावसत्त्वादतिव्याप्तेरनवकाशात् ॥ न च
तुल्ययुक्त्या हेतुनिष्ठवृत्तित्वत्वेन जगद्वृत्तित्वाभावमादाय सद्धेतावपि लक्षणायोगवारणाय प्रतियोगितायां स्वन्यूनवृत्तिध
स्य र्मानवच्छिन्नत्वविशेषणस्य विशेषरूपेण सामान्याभावीयप्रतियोगित्वे विशेषमात्रनिष्ठत्वाभ्युपगमस्य वाऽवश्यकत्वे
न ताद्दशाभावनिरास इति वाच्यं ॥ एवमपि वन्हिजगद्वृत्तित्वान्यतरत्वेन वन्हिजगत्संयुक्तत्वोभयाभावमादायातिव्याप्तेर्नि
रास इति चेन्न ॥ दर्शितान्यतरत्वेनोभयाभावस्य वन्हित्वेन ताणीतार्णदह नोभयाभाववद्दनंगीकारात् ॥ अन्यथानुव्याप्युक्ता

हेतुवृत्तित्वजगद्वृत्तित्वान्यतरत्वेन तादृशोभयाभावमादाय सद्धेतौ लक्षणायोगस्य दुर्वारत्वात्॥ यद्यपि तादृशाभावस्वी
कारेपि तमादायाव्याप्तिवारणाय पर्वतत्वं देयं॥ न च तथा सति पर्वतत्वमेव नोपादेयमिति ग्रंथासंगतिरिति वाच्यं॥ अ
व्याप्तिसंपादकद्भिन्नाभावव्यावर्तनास्य व्यापकवृत्तित्वत्वकत्वस्य पर्वतत्वघटकस्यैव ग्राह्यत्वात्॥ नोपादेयमित्यस्य वि
शिष्टत्वानुपादान एव तात्पर्यकल्पनात्॥ तादृशविशिष्टत्वस्यातिव्याप्तिवारणप्रयोजनकत्वसंभवेपि तद्वारणा
य शेषदले समुदायनिवेशस्यैव लघुत्वमिति तदनुपादानतोक्तिरिति विभावनीयं॥ अत्र शेषदले समुदायप्रवेशोपादाने
पर्वतत्वोपादानमावश्यकमित्यसंगतत्वं समुदायरहितोत्तरदलसहितपर्वतत्वोपादाने वन्हिमान्धूमादित्यादौ प्रसक्ता
त व्याप्तिवारणस्य शेषदले समुदायप्रवेशप्रयोजनस्य सत्वाद्दूषणमिदमेव सम्यगिति केचिद्दयनेनास्वरसः सूचितः॥ अ
विरोधादिति॥ प्रतियोगितासंसर्गकाभावज्ञान एव प्रतियोगितावच्छेदकांशे उपलक्षणतयाभानस्यानुभवविरुद्धत्वादि
तिभावः॥ प्रतियोगितासंसर्गकव्याप्तिज्ञानस्यैव लाघवेनानुमितिहेतुत्वमित्यभिप्रायेणाह॥ वस्तुतस्त्विति॥ भेदकूट
मेव निवेश्यमिति॥ स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्ववान्निष्ठभेदप्रतियोगितावच्छेदकत्वसमानाधि
करणोभयावृत्तित्वपरिचित्तधर्मविच्छिन्नप्रतियोगिताकभेदकूटवत्त्वसंबंधेन स्वविशिष्टप्रतियोगितैव निवेश्या तेन
तादृशकूटस्य दुर्ज्ञेयत्वेपि न व्याप्तिज्ञानानुपपत्तिः संबंधज्ञानस्य विशिष्टबुद्धावहेतुत्वस्यान्यत्रोक्तत्वात्॥ कूटस्य संबंधत्वे

न तज्ज्ञानोपेक्षणात्॥ वृत्तिपदस्य संबंधित्वार्थकत्वमावश्यकमिति॥ नन्वेवं सति समवायेन चन्द्रः साध्यत्वे संयोगेन धूमस्य हेतुत्वे व्याप्तिः
धूमाद्यभावाधिकरणगगनसंबंधित्वस्य व्यधिकरणधर्मावच्छिन्नाभावस्य वृत्तिमत्त्वोदितिचेन्न गगनमहाकालान्यो घटादियादावि
॥७८॥ सादिपदसंग्राह्यत्वात्तादृशव्याप्तिव्याप्तेः॥ न चैवं प्रसिद्धसाध्यकस्थलसाधारणानैश्चिंत्यं शंक्यं॥ वृत्तिपदस्य यथाश्रुतार्थपरत्वाभिप्राये
णैतत्साधारणत्व॥ वस्तुतस्तु साध्यवदनुयोगिकत्वहेतुप्रतियोगिकत्वोभयाभावाद्वृत्तिर्वृत्तित्वे तदुभयाभावव्याप्यं यत्साध्याभाववन्निरू
पितहेतुतावच्छेदकसंबंधेन संबंधित्वं तदभाव एव निवेश्यो निरुक्तस्थले गगनान्यसाध्याभाववत्संबंधित्वमेव न तथेति तादृशाभाव
स्य वृत्तिमत्त्वेऽपि नाव्याप्तिरिति संक्षेपः॥ एतेन वृत्तिपदस्य संबंधार्थतानालोचनं कथं वक्तुं शक्यं तादात्म्यसंबंधेन हेता
वव्याप्तेरग्रिमदूषणानवतारत्वाच्च हेतोरेव चनेकथं साध्यतावच्छेदकसंबंधनिवेशोपि तद्दोषाणालोचनमिति शंकानवकाशः॥ प्रथ
मदोषस्य मतद्वयसाधारण्याभावेन तदनुशावनात्साध्यतावच्छेदकसंबंधविवक्षायां चोक्तविवक्षया नाव्याप्तेरपि वारणात्॥ तेना
न प्यनिव्याप्तिर्वारयितुं शक्यैवेति॥ अत्रेदं विचार्यं साध्यसामानाधिकरण्यविशेषणेन तद्वह्निमान्तद्वदन्यवयवत्वादित्यादावतिव्याप्ति
वारणसंभवेऽपि सामान्यतः॥ संयोगेन वह्निमान्वह्न्यवयवत्वादित्यत्रातिव्याप्तिर्दुर्वारा वह्न्यवयवे वह्नेः संयोगासंभवेऽपि स्यात्तद्विक्तच
न्हिसंयोगोत्पत्तौ बाधकाभावादन्यथैतदुभावयवेषु मांत्तरसंयोगसत्वस्य सार्वभौमनिरुक्तौ स्वयमुक्तस्यानुपपत्तिरिति॥ नाना
विपक्षकेति॥ वह्निमत्त्वप्रकारकप्रमाविषयोधर्मादित्यादावित्यादिः॥ तेन संयोगेन वह्निसाध्यके संयोगसंबंधावच्छिन्नप्रति
योगिताकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावकूटाधिकरणस्य गुणादेः प्रसिद्धत्वेऽपि न क्षतिः॥ समव्यापकतावच्छेदकेति॥ साध्यता

वच्छेदकव्यापकत्वे सति तद्व्याप्यतावच्छेदकधर्मावच्छिन्ने यत्र्थः ॥ तद्व्याप्यतावच्छेदकत्वं च स्वावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदककत्वं ॥
अव्याप्यनवकाशादिति ॥ ननु साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे वन्ह्यभावघटितकूटस्य तल्लक्षणाघटकत्वा
त्तार्णत्ताणदृहनोभयाभावघटितकूटमादायाव्याप्तिरस्त्येवेति चेन्न ॥ साधनसामानाधिकरण्यविशेषणपक्षे साध्याभावे साध्य
समानाधिकरणसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वविशेषणस्य वक्ष्यमाणत्वाद् द्वित्वोभयाभावस्य तादृशविशेषणानां
चोत्तनयातद्घटितकूटस्य लक्षणघटकत्वविरहात् ॥ वाच्यत्वभिन्नेति ॥ साध्यतावच्छेदकसंबंधेन वृत्तिमतीत्यादि ॥ तेन वाच्यत्वभि
न्नत्वेन वाच्यत्वे गगनान्यतराभावस्य वाच्यत्वभिन्नत्वेन वाच्यत्वाभावसमनीयतत्वेन तद्दत्वभिन्नतया तद्दीयप्रतियोगितायां वाच्य
त्वान्यगगनवृत्तित्वसंभवेपि न क्षतिः ॥ साध्यतावच्छेदकसंबंधावच्छिन्नाधेयताविशिष्टप्रतियोगितात्वेन समनैयत्यविवक्षणा
ने च्च नसमनैयत्यसंगइसवधेयं ॥ यच्चप्येवं रीत्या लक्षणसंगमेपि धमत्वेन प्रमेयाभावीयप्रतियोगितायाः प्रमेयसामान्य
वृत्तितया धूमाभावो न लक्षणघटक इति धूमभिन्नत्वेन धूमाभावमादाय तत्र व्याप्तिस्तथापि वन्हित्वेन प्रमेयसामान्याभावपरि
सागावसरे नोदृशप्रतियोगितायाः वन्हिमात्रे निष्ठत्वव्यवस्थापनांग दोषः ॥ समवायित्तयावाच्यत्वाभावस्य लक्षणाघटकत्वेऽ
प्यथेत्यादिग्रंथस्यैतल्लक्षणाभिप्रायकत्वमनुपपन्नमित्याशयेन तस्य लक्षणघटकत्वार्थमाह ॥ वस्तुतस्त्विति ॥ यत्तु वाच्यत्व
भिन्नत्वेन वाच्यत्वाभावस्य लक्षणाघटकत्वेपि कूटाप्रसिद्ध्याऽव्याप्तिवारकतया तदवतरणं तन्न सम्यक् ॥ समनीयताभावे वयमतेऽसि
द्धांतेपि कूटाप्रसिद्धेरव्यासज्यवृत्तिनेकवृत्तिधर्मभिन्नधर्मावच्छिन्नाधिकरणस्यैव समुदायाधिकरणमिति सनेन विवक्षणीयत

याऽद्दोषात्॥ ज्ञानानपेक्षापत्तेरिति॥ यदि च ज्ञानानपेक्षा नास्त्येव स्वच्यते तदा चक्रवर्तित्वलक्षणोक्तेरिसा तत्सिद्धिर्बोध्या॥ अन्
॥८०॥ येव मितिं॥ मिश्रलक्षणेपर्याप्तिनिवेशो व रूपको ऽन्यथा साध्यव्यापकतावच्छेदकवह्नित्वावच्छिन्नप्रतियोगिताकमहान
सीयवन्ह्यभाववद्वृत्तित्वाभावस्य हेतावसत्वादव्याप्तेः॥ यद्यपि॥ वह्नित्वेन घटाभावस्य तल्लक्षणाघटकत्वेऽपि वह्निसामा
न्याभावमादाय लक्षणसमन्वयः॥ संभवति तथापि न लक्षणे हेतुतावच्छेदकसंबंधेन चिद्धिकरणे वर्तमानत्वविशे
षणावरूपकतया तदा कोन्तया वदभावाप्रसिद्धेः र्व्यसामान्याभावादेरनथात्वादिति वह्नित्वेन घटाद्यभावस्य लक्षणघ
टकत्वावरूपकत्वं तन्न संभवतीति त्रांकाता त्ययैः॥ व्यापकतानवच्छेदकावृत्तीति॥ इदमन्यत्र साध्यतावच्छेदकसंबंधेन
व्यापकतानवच्छेदकत्वस्य विलक्षणी यत्तया संयोगेन द्रव्यत्वप्रमेयादिसाध्यकेत्तादृशाव्याप्तिरपरिहार्येवास्मिन्नल्प
वृत्ति॥ एवं चेति॥ घटत्वसमवायित्वादिना वाच्यत्वाभावस्यापि लक्षणघटकत्वे चेत्सर्थः॥ पूर्वकल्पे समवायित्वया वाच्य
त्वाभावस्य लक्षणाघटकत्वादुपष्टंभसंगतिः॥ द्रव्यत्वप्रकारकप्रमाविषयत्वादिति॥ द्रव्यत्वस्य समवायेन हेतु
त्वेज्ञातिवच्छिन्नाभावघटितकूटवत्तिसमवायेन वृत्त्यप्रसिद्ध्या नातिव्याप्तिरतो नावत्स्यर्येतानुधावनं॥ स्वप्रति
योगिसामानाधिकरण्याभावविशिष्टाभावघटितताया इति॥ स्वाधिकरणावच्छेदेन स्वप्रतियोगिसामानाधिकरण्याभाववदभाव
घटितताया इत्यर्थस्तेन केवलान्वयाभावादेस्तादृशविशिष्टाभावानतिरेकेऽपि न क्षतिः स्वप्रतियोगिता॥ जन्यत्वादेस्तत्सामा ॥८०॥

नाधिकरण्याभाववद्विशिष्टतद्भाववत्त्वेन॥ तादृशोभयत्वाभावे जलत्वावच्छेदेन प्रतियोगिसामानाधिकरण्याभाववत्त्वेन॥
निवेशसंभवादिति॥ ननु प्रतियोग्यसामानाधिकरण्यघटकप्रतियोग्यधिकरणत्वं साध्यतावच्छेदकताघटकसंबंधेनैव वक्त
व्यं तथा च कालिकसंबंधेन सर्ववत्तत्तादात्म्यसंबंधेन साध्यतायां सर्ववद्भेदीयप्रतियोगित्वाधिकरणमहाकालत्वावच्छेदेन प्रति
योगिसामानाधिकरण्याभाववद्विशिष्टाभावाप्रसिद्धिरिति चेन्न॥ स्वाधिकरणावच्छेदेन प्रतियोगितावच्छेदकसंबंधेन प्रति
योगिसामानाधिकरण्याभाववद्भावीयप्रतियोगितासामान्ये यन्निष्ठत्वं साध्यतावच्छेदकताघटकसंबंधावच्छिन्नोभयाभाव
त्त्वस्य विवक्षितत्वात्॥ सामानाधिकरण्यपरस्य व्याप्यवृत्तित्वे त्वाह॥ अथवायन्निरूपितेति॥ सामान्यपदानुपादाने संयो
गेन वह्निमत्तत्तादात्म्येन साध्यतायां साध्यतावच्छेदकताघटकपर्वतानुयोगिकवह्निसंयोगे प्रतियोगित्वाधिकरणय
त्किंचिन्महानसानुयोगिकत्वाभावसत्त्वेन वह्निमद्भेदीयप्रतियोगिताव्यापकत्वस्य वह्निरूपसाध्यतावच्छेदके ऽनुपपत्तिर
तस्तदुपादानं॥ पृथिवीत्वघटत्वपर्याप्तौ जातिसामान्याभावीयप्रतियोगिताधिकरणानुयोगिकत्वसामान्याभावासत्त्वेन
तादृशोभयत्वस्यापि तादृशप्रतियोगिताव्यापकत्वापत्तिरतो यत्किंचिदिति॥ समवायैक्यमते तु यन्निरूपितसाध्यतावच्छेद
कताघटकसंबंधानुयोगितासामान्ये प्रतियोगित्वाधिकरणयत्किंचिन्निष्ठत्वाभावस्तदन्यत्वमेव विवक्षणीयं॥ नन्ववा
पि कालिकसंबंधेन सर्ववत्तत्तादात्म्यसंबंधेन साध्यतायां तादृशसाध्यवद्भेदीयप्रतियोगिताव्यापकत्वं साध्यतावच्छेदकेदु

रूपपादं वृत्तिमन्मात्रस्य यत्पदेनोपादाने तन्निरूपितसाध्यतावच्छेदकताघटककालिकसंबंधेन तादृशप्रतियोगिताधि
॥८०॥ करणानुयोगिकत्वस्यैव सत्वात्तदभावो न संभवयत्ने रूपादाने तन्निरूपितता दृशसंबंधस्यैवाप्रसिद्धेः॥ मैवं गगनादिना
मद्वृत्तित्वमते तादृशसंबंधसामान्ये यत्प्रतियोगिकत्वप्रतियोगिताधिकरणयत्किंचिद्व्यक्त्यनुयोगिकत्वोभयाभावस्तदन्य
त्वस्यैव प्रतियोगितावापकत्वरूपत्वात्तत्र गगनादेरेव यत्पदेनोपादानसंभवात्॥ न च यत्पदेन गगनस्योपादानसंभवेपि
तन्निष्ठत्वस्य सर्वत्वावच्छिन्ने ऽसत्वात्सर्वत्वावच्छिन्नस्य व्यापकत्वानुपपत्तिरिति वाच्यं॥ यत्प्रतियोगित्वरूपाने यद्धर्मविच्छि क
न्नप्रतियोगिकत्वं निवेश्य तदवच्छिन्नापर्याप्तिकविषयतापर्याप्त्याश्रयत्वस्य विवक्षितत्वात्॥ गगनादीनां वृत्तित्वम
तेनुत्वाधिकरणयत्किंचिन्निष्ठाभावप्रतियोग्यनुयोगितासामान्ये यत्प्रतियोगिकसाध्यतावच्छेदकताघटकसंबंधनि
रूपितत्वाभावस्तत्वमेव प्रतियोगितावापकत्वं स्वप्रतियोगिता॥ ननु महानसीयवन्हिसाध्यके व्यभिचारिणि वन्हिसा
मान्याभावीयप्रतियोगिताया अपि साध्यतावच्छेदकताश्रयीभूतवन्हित्वव्याप्यत्वाव्यापकत्वाच्च तन्निरूपकाभावमादायाति
व्याप्तिः॥ न च साध्यतावच्छेदकतापर्याप्त्यधिकरणव्याप्यत्वं विवक्षणीयमिति वाच्यं॥ उभयत्वावच्छिन्नसाध्यकउभयाभावीय
प्रतियोगितायास्तव्याप्यत्वानुपपत्तिस्तत्रोभयत्वधर्मिनावच्छेदकस्यापि साध्यतावच्छेदकतापर्याप्त्यधिकरणत्वान्मैवं॥ त
त्र द्वित्वस्यैव साध्यतावच्छेदकत्वात्तद्धर्मितावच्छेदकस्यापि तत्वे च साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकता

कप्रमीयप्रकारताव्याप्यत्वस्यैवाविवक्षणान्नानुपपत्तिः॥ जन्यरूपत्वावच्छिन्नाभावेति॥ यद्यपि जन्यजले पाकादौ च रूपध्वंसो ना
स्तीति प्रतीते जन्यरूपाभावेपि रूपध्वंसत्वावच्छिन्नप्रतियोगिताकत्वमसंभवदुक्तिकं तथापि जन्ये घटस्य पाकजन्येयर्षि इति
ध्येयं॥ तत्तद्दधिकरणत्वेनेति॥ स्वनिरूपकजन्यरूपाभावरूपसंबंधेन रूपध्वंसत्वावच्छिन्नप्रतियोगिताया जलत्वपरमाणौ
सत्त्वादिति भावः॥ स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यस्य विवक्षणादिति॥ यद्यपि वह्न्यादिसाध्यके
साध्याभावीयप्रतियोगितायाः किंचिद्विशिष्टस्याभावेपि सत्त्वेन तदभावीयप्रतियोगितात्वेन तस्याः साध्यतावच्छेदकव्या
प्यत्वासंभवाद्व्याप्यदिशि स्वावच्छेदकावच्छिन्नत्वविशेषणमर्थवद्व्यापकदिशि तद्व्यर्थमेव॥ तथापि स्वावच्छेदकावच्छिन्नाचतद
भावीयाच स्वावच्छेदकावच्छिन्नतदभावीयत्वे च तत्प्रतियोगिने च स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगित्वे तयोभविस्ता
दृशप्रतियोगितात्वं तेन तादृशप्रतियोगितात्वेनेतिरश्नुसरस्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वयोर्लाभोऽ
वच्छिन्नत्वंतरीयार्थः समनैयत्यस्य शद्वार्थः व्याप्यत्वं व्यापकत्वं च॥ स्वावच्छेदकावच्छिन्नत्वान्वितावच्छिन्नत्वस्य व्याप्यत्वेऽन्व
यस्तु तदभावीयप्रतियोगिनात्वान्वितावच्छिन्नत्वस्य व्यापकत्वेऽन्वयो व्याप्यत्वव्यापकत्वयोः स्वसंबंधिकत्वेन विशिष्ट
घटकैकदेशान्वयेपि नासामंजस्यं तथा च स्वावच्छेदकावच्छिन्नत्वेन व्याप्यतात तदभावीयप्रतियोगितात्वेन व्यापकतानिवेश
नीयेति लभ्यते एवं सति व्यापकतायाः सामान्यरूपावच्छिन्नाया व्याप्यतायाश्च विशेषरूपावच्छिन्नाया एव निवेशादि
सवनरणग्रंथोक्तिरपि संगच्छते॥ न च व्याप्यदिशि तदभावीयप्रतियोगितात्वस्योक्तरीत्या दूरत्वाभेऽतस्तदभावीयत्वं प्रति

योगिताविशेषणमिति त्वाव्याप्तिकथनपरं ग्रंथविरोध इति शंक्यं॥ तादृशग्रंथस्य देयमिति पदपूरणेन शब्दलभ्यवि
॥८४॥ शेषणातिरिक्तविशेषणदानप्रयोजनपरत्वात्॥ तत्तदधिकरणावृत्तिमन्यत्वमिति॥ तत्तदधिकरणवृत्तित्वाभावकूटस
मानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावकूटवत्त्वमित्यर्थः॥ उभयावृत्तित्वपर्यंतं परिचायकं॥ एतेन तत्तद्वृत्तिनिष्ठप्रतियोगिताकाभा
ववत्वविवक्षणे व्यभिचारिसामान्येऽतिव्याप्तिस्तादृशगगनाभाववत्वस्य जगत्येव सत्वात्॥ तत्तद्वृत्तितावच्छिन्नप्रतियोगिताकाभा
वस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वमते विवक्षितुमशक्यत्वं केवलान्वयिन्यवृत्तित्वमात्रस्य तत्प्रतियोगितावच्छेदकत्वसं
भवेन तादृशाभावाप्रसिद्धेरिति शंका निरस्ता॥ जातिमत्तामेवेति॥ अथ जातिप्रतियोगिकाभाववान्मेयत्वादित्यादौ सत्ताविशिष्ट
जातिप्रतियोगिताकाभावीयप्रतियोगिताया अपि साध्यतावच्छेदकसमनियतत्वेन तादृशप्रतियोगिताकाभावघटितकृत्स्ना
धिकरणसामान्यादिचतुष्टयमिति जगत एव तादृशान्यत्वमाधिकरत्वमिति नाव्याप्तिः॥ न चातिप्रसंगानापादकलघुधर्मस्या
वच्छेदकत्वेन तादृशाभावीयप्रतियोगिताया सत्तावैशिष्ट्यस्यैवावच्छेदकत्वसंभवात्तादृशविशिष्टाभावाप्रसिद्धिः सत्तावैशिष्ट्यावच्छि
न्नाभावीयप्रतियोगिताया अपि साध्यतावच्छेदकव्यापकत्वविरहाद्घटत्वपटत्वादिरूपाभावानामेव लक्षणघटकतया जातिमत्तामेव ता
दृशाधिकरणान्यत्वमिति वाच्यं॥ तथासति विशिष्टसत्तावोत्क्रान्तेरित्यादौ साध्याभावस्योक्तयुक्त्या लक्षणाघटकत्वेन वैशिष्ट्या
वच्छिन्नाभावीयप्रतियोगिताया साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वविरहेण घटत्वादिना सत्ताभावमादायातिव्याप्तेः॥ पृ
थिवीन्यत्वविशिष्टद्रव्यत्ववद्व्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावमादायातिव्याप्तिदानासंगतेश्चेत्तत्रापि द्रव्येतरासमवेतत्व

विशिष्टसत्ताकत्वं इत्यसमवेतत्वरूपं इत्यतस्तदपेक्षयाऽद्येतरासमवेतत्वस्यैव लघोरिति प्रसंगानापादकस्यावच्छेदकत्वसंभवेन तादृशाभावा
प्रसिद्धेरतस्मात्तद्घसमनीयं गुरोरेवानवच्छेदकत्वमिति सिद्धांतानुसरणं प्रकृते युक्तं तथा सति सत्ताविशिष्टजातिप्रतियोगिकाभावा
भावस्यापि लक्षणघटकत्वं दुर्वारमिति चेन्न । तादृशाभावस्य विवक्षणीयसाध्यसमानाधिकरणसमानाधिकरणधर्मावच्छिन्नप्र
तियोगिताकाभावान्यत्वविरहेण लक्षणाघटकत्वात् । न च न व्यासतिघटत्वपटत्वादिरूपाणामप्यभावानां साध्यसमानाधिकरण
त्वात् समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाच्च लक्षणाघटकत्वेनाव्याप्त्यभावेन साध्यतावच्छेदकव्याप्यत्वविशेष
णवैयर्थ्यमिति वाच्यं । समनियताभावैक्यमते साध्यसमानाधिकरणसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाकाशाभा
वभिन्नत्वस्य क्वापि अधिकरणधर्मावच्छिन्नाभावेऽसत्त्वात् द्रव्यत्वसाध्यके तादृशाभावाप्रसिद्ध्याऽव्याप्तिवारणाय समानाधिक
रणधर्मे साध्यतावच्छेदकव्यापकत्वस्य विवक्षणीयत्वात् घटकत्वाभावत्वादौ तद्विरहाद्घटकत्वाद्यात्मकाभावानां लक्षणघटकत्वात्
ते ॥ न चैवमपि सत्ताभावसाधारणजातिप्रतियोगिताकाभावत्वरूपसाध्यतावच्छेदकव्यापकत्वस्य सत्ताविशिष्टजातिप्रति
योगिताकाभावत्वेऽसत्त्वात्तदवच्छिन्नाभावस्य लक्षणघटकत्वं दुर्वारमिति वाच्यं । सत्तान्यजातिप्रतियोगिताकाभावस्यैव साध्य
त्वेनानुपपत्त्यभावात् ॥ किंचिद्विशिष्टसाध्यस्येति ॥ यद्यपि सार्वभौममते विशिष्टस्यातिरिक्तत्वाच्च दोषोऽपि न स्यान्न तिरिक्त स्तथा
त्वाभिप्रायेणेदं ॥ दैशिकविशेषणतावगाहिबोधजनकत्वस्यैव नञ्पदस्य सत्त्वादिति ॥ नत्तुपस्थाप्याभावविशेष्यकदै
शिकविशेषणतासंबंधावच्छिन्नाधेयताप्रकारकशाब्दबोधं प्रति प्रतियोगिवाचकपदसमभिव्याहृतनञ्पदज्ञानत्वेनका

रणतायाः सर्वसिद्धत्वादिसमर्थः ॥ सर्वानुभवसिद्धस्योच्छेदापत्तेरिति ॥ यद्यपि दैशिकविशेषणतासंबंधावच्छिन्नप्रति
योगिताकाभावे दैशिकविशेषणतासंबंधावच्छिन्नप्रतियोगिताकत्वसंशयरज्ञायाभयमभावो नास्तीतिवाक्यादेतदभा
॥८२॥ वाभावस्य दैशिकविशेषणतयाऽनिश्चयात्तेन संबंधेन तत्संशयोच्छेदः ॥ सिद्धांतेपि तुल्यस्तथापि कालिकसंबंधावच्छिन्न
प्रतियोगिताकात्यंताभावे समवायसंबंधावच्छिन्नप्रतियोगिताकत्वभ्रमवतोऽयमभावो नास्तीति वाक्यात् कालिकसंबं
धानवगाहनस्य सर्वानुभवसिद्धत्वयोक्तनियमभंग इत्यस्यैव तात्पर्यं ॥ अत्र केचित् ॥ वदंतीत्यनेनास्वरसः सचैतद्रूपाभावसा
ध्यकेरूपाणामनंतत्वेपि दैशिकविशेषणतासंबंधावच्छिन्नरूपाभावाभावत्वावच्छिन्नाधिकरणत्वस्य प्रसिद्धत्वादग्रिमग्रंथ
विरोधः एवमत्तेयदिचेत्यादिरितावन्निर्भरात् साध्याभावत्वस्याधिकरणतानिरूपकतावच्छेदकत्वयानप्रवेशः ॥ प्रयोज
नाभावात् ॥ किंच प्रतिबंधकत्वमेककाले एकत्र वर्तमानत्वं ॥ ईश्वरीयव्यधिकरणधर्मावच्छिन्नाभावमादायैवतन्निर्वाह इत्यसा
हुः ॥ तदसत् ॥ अवच्छिन्नदैशिकविशेषणतासंबंधावच्छिन्नाधिकरणतासंबंधेन साध्यतावच्छेदकसमनियतप्रतियोगिता
निरूपितानुयोगिताकूटस्यैव निवेशेनानुयोगितायाश्चानुयोगिभेदेन भिन्नत्वात्कूटाधिकरणत्वाप्रसिद्ध्यभावेनाग्रिम
ग्रंथविरोधविरहात् ॥ अपिच प्रतिबंधकतायाः पूर्वोक्तरूपत्वे यादृशस्थले व्यधिकरणधर्मविशिष्टसाध्यवत्ताज्ञानंनाभ
वत्तद्बोधोनवारयितुंनशक्यः ॥ अपिच वह्निसाध्यकेकालिकसंबंधस्यापिलक्षणघटकत्वापत्तेः कालिकसंबंधावगाहि

यादृशवन्ह्यभावज्ञानकाले वन्हिमत्ताज्ञानं नाजनि एतादृशकालिकसंबंधावगाहिवन्ह्यभावज्ञानस्य प्रतिबंधकत्वापातादिति न
किंचिदेतत्॥ व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वेति॥ अथैवमपि सत्ताद्रव्यत्वपृथिवीत्वैतत्त्रित्वावच्छिन्नसाध्यके द्रव्यत्वादौ व्य
भिचारिणि सत्तापृथिवीत्वेतरद्रव्यत्वान्यतरद्रव्यत्वोभयत्वावच्छिन्नाभावीयप्रतियोगिताया अपि साध्यतावच्छेदकसमनीयतत्वेन व्या
सज्यवृत्तित्वेन साध्यतावच्छेदकसजातीयधर्मावच्छिन्नत्वेन तादृशाभावस्यापि लक्षणघटकतया तद्दुष्टिनकूटाधिकरणं गुणादिरेव स
तिव्याप्तिर्दुर्वारेतीचेदत्र केचित्॥ स्वधर्मितावच्छेदकत्वेनभासमानयावद्धर्मघटितत्वे सति पर्याप्तिसंबंधे न वृत्तिमत्त्वरूपस्वनिष्ठव्यासज्य
वृत्तित्वेन साजात्यं विवक्षणीयं न चैवमपि निरुक्तत्रित्वरूपसाध्यतावच्छेदकधर्मितावच्छेदकत्वेन भासमानद्रव्यत्वसत्तात्वयोरपि नि
रुक्तद्वित्वाश्रयीरेऽन्यतरत्वघटकभेदप्रतियोगिनी विशेषणत्वाच्च दुष्टिनत्वस्य निरुक्तद्वित्वेऽसत्त्वान्नोक्तातिव्याप्तिवारणसंभव इ
ति वाच्यं॥ तद्दुष्टिनत्वस्य तदवच्छिन्नमुख्यविशेष्यतानिरूपितप्रकारताश्रयत्वरूपस्यैव विवक्षितत्वात् तस्य च तादृशद्वित्वेऽभावा
दित्याहुः॥ परे तु स्वपर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिकत्वेनैव साजात्यं विवक्षणीयं तथा च निरुक्तत्वपर्याप्त्यवच्छेदकधर्मा
वच्छिन्नपर्याप्तिकत्वस्य निरुक्तद्वित्वेऽसत्त्वान्न तदवच्छिन्नाभावमादायातिव्याप्तिः॥ न चैवं सति पर्याप्तिश्चायमेकः इमौ द्वावित्या
दावयमेकः इति लिखनस्वारस्येनाव्यासज्यवृत्तिधर्माणामपि पर्याप्तिस्वीकारेण वाच्यत्वत्वपर्याप्त्यवच्छेदकवाच्यत्वनिष्ठत्वव्यक्तित्वा
वच्छिन्नपर्याप्तिकत्वस्य वाच्यत्वत्वेऽसत्त्वेऽपि समवायित्वेऽभावात् तादृशसजातीयधर्मावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या वाच्यं हे

यत्तादिस्यादावव्याप्तिरितिवाच्यं॥ व्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितायां समानाधिकरणधर्मस्याप्यवच्छेदकत्वव्यवस्था
पनेन तादृशानिरुक्तरूपेण वा व्यक्तत्वे तत्सजातीयत्वाच्च तत्तावच्छिन्नत्वस्य तादृशाभावीयप्रतियोगितासामञ्जसत्त्वात्॥ सजातीयधर्माव
॥८३॥ च्छिन्ने सत्त्वेन न्यायावच्छिन्नत्वानिवेशादितिचेदिति॥ साध्यतावच्छेदकस्य प्रतियोगिताव्यापकत्वस्थाने प्रतियोगितावच्छिन्नस्य व्याप
कतावच्छेदकत्वनिवेशेति॥ अथैवं विशिष्टसाध्यके विशिष्टाभावस्यलक्षणघटकत्वानुपपत्तिस्तादृशाभावीयप्रतियोगिताव
च्छिन्नस्य हि व्यापकतावच्छेदकत्वस्य साध्यतासाध्यतावच्छेदकेऽभावात्॥ न च विशिष्टाभावीयप्रतियोगितामादाय तादृशाभावस्योपलक्षि
ताभाववैलक्षण्यनिर्वाहाय विशेषणांतर्भावेन पर्याप्तत्वस्य वक्तव्यत्वात्तदवच्छिन्नव्यापकतावच्छेदकत्वं साध्यतावच्छेदकेऽक्षतमिति
वाच्यं॥ तथापि साध्यतावच्छेदकसंबंधेनैव स्वावच्छिन्नाधिकरणत्वस्यैव वक्तव्यत्वात्तादृशसमवायेन गुणाद्यन्यत्वद्रव्यत्वोभयत्वावच्छिन्ना
धिकरणत्वस्यैव तादृशप्रतियोगितावच्छिन्नस्य समवायेनाधिकरणत्वस्याप्रसिद्धत्वया तादृशप्रतियोगितायाः स्वपदेनोपादानासं
भवादितिचेदत्रकेचित्॥ विशिष्टाभावस्योपलक्षिताभावाद्वैलक्षण्याय विशिष्टाभावीयप्रतियोगितायां विशिष्टप्रतियोगिक
संबंधस्यैवावच्छेदकत्वं॥ एवं च विशिष्टसत्ता वा नेति ज्ञानस्य प्रतियोग्यभावाच्च योऽनुपयोगक्षेमावितिन्यायेन विशिष्टप्रति
योगिकसंबंधावगाहित्वे सिद्धेऽनुमितिविधेयतावच्छेदकत्वमपि तस्यैवेति साध्यतावच्छेदके विशिष्टप्रतियोगिकसंबंधेन वि
शिष्टाभावीयप्रतियोगितावच्छिन्नव्यापकत्वस्य साध्यतावच्छेदके प्रतियोगितायां विशेष्यमात्रनिष्ठत्वेप्यक्षतत्वात्॥ न च वि
शिष्टप्रतियोगिकसंबंधस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वं विचारासहमितिवाच्यं॥ तादृशाभावीयप्रतियोगिताया

विशेषणांतर्भावेन पर्याप्तत्वस्यापि प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगितापर्याप्त्यधिकरण
तया सामान्याभावस्य विरोधांगीकर्तव्यधिकरणधर्मावच्छिन्नाभाववादिमते विचारासहत्वात्॥ यादृशदंडद्वयं परस्परासत्त्वयत्ता
दृशान्यतरविशिष्टान्यतराभावस्य तादृशान्यतरोपात्तसिद्धान्यतराभाववैलक्षण्यस्य विशिष्टाभावीयप्रतियोगितापावि
शेषणांतर्भावेन पर्याप्तत्वस्वीकारेप्यनिर्वाहात्॥ दर्शितस्थले विशेषणविशेष्ययोर्वैयर्थ्यात्स्मात्कुत्रचिद्विशिष्टाभावीयप्रतियोगि
ताया विशेषणविशेष्यपर्याप्तत्वं कुचित्तस्या विशिष्टप्रतियोगिकसंबंधस्यैवावच्छेदकत्वमिसेवं विशिष्टाभावभेदेनम्यवस्था
॥ प्रकृते गुणान्यत्वविशिष्टप्रतियोगिकसंबंधस्य तादृशाविशिष्टाभावप्रतियोगितावच्छेदकत्वे बाधकविरहात्तदभिप्रायको ऽ
यं ग्रंथः यद्वा स्वावच्छिन्नव्यापकतावच्छेदकत्वस्थाने स्वावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वमेवेति वेत्संतयाचनकोपि दोष इति
वदंति॥ वस्तुतः रक्तघटत्वपटत्वोभयस्य समवायेनैकत्रासत्वेपि घटपटोभयवदिति प्रतीतिबलाद्घटत्वपटत्वद्वित्वैतन्नि
तयपर्याप्तविलक्षणावच्छेदकेनानिरूपकताकाधिकरणताभ्युपगमादौ स्वीक्रियते न तथा समवायेन विशिष्टाभावप्रति
योग्यधिकरणमिति प्रतीतिबलाद्व्यासज्यवृत्तितादृशप्रतियोगितावच्छिन्नसमवायसंबंधावच्छिन्नाधिकरणता
पि विशिष्टाधिकरणे स्वीक्रियत इति परमतास्पर्थः॥ नचैवं समानाधिकरणेति ननु संयोगिसत्तादिसाधारण
तिव्याप्तिः संयोगाभावस्य स्वसमानाधिकरणाभावप्रतियोगित्वेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वादिति चेन्न
स्वाधिकरणे यत्किंचित्त्वस्य विवक्षितत्वात्॥ तथा च दाहनवच्छिन्नवृत्तित्वं वेति॥ पृथिवीवृत्तिगुणान्यत्वमितसत्त्वगुणपदव्यावृत्तिं द

र्य्यन्ति॥ पृथिवीसमवेतत्वावच्छिन्नाभाव इत्यादिना॥ अप्रसिद्धेरिति॥ वायुत्वहेतोर्व्यभिचारित्वान्निर्वाहाय पृथिवीसमवेत
त्वोपलक्षिताभावस्यैव साध्यतया समवेतत्वसामान्यस्य तादृशाभावप्रतियोगितावच्छेदकत्वेपि क्षतिविरहादिति भावः॥ विशि
॥८४॥ ष्टाभावस्य साध्यत्वमभिप्रायेण शङ्कते॥ न चेति॥ उपलक्षिताभावस्य साध्यत्वाभिप्रायेण समाधत्ते॥ समवेतत्वेति॥ गुणपदोपा
दानमिति॥ अत्र यद्यपि विशिष्टाभावस्य साध्यत्वे वायुत्वस्य सद्धेतुतापत्त्योपलक्षिताभावस्यैव साध्यत्वं वक्तव्यं तस्य च गुणसा
मान्याभावसमनीतयत्ततमगुणत्वस्यैवावच्छेदकत्वसंभवतीति पर्वतोत्स्यमिति शंकासंभवति। तथापि यादृशाजले पृथिवीत्
त्विगुणः कदापि नोत्पन्नस्तादृशाजलमस्तीत्यभिप्रायेकल्पनान्न दोष इत्यस्य सत्त्विगुणसामान्याभावस्य तादृशाभावसमनैयत्य
सासंभवात्॥ अत्र पृथिवीपदं पृथिवीसामान्यपरमेवेति॥ अत्रेदं चिंत्यं पूर्वानुमान एतद् इति व्याप्तिवारणानुरोधेनैतदूपा
त्तनाभाववान्नेयत्यादिसाध्यवतिव्याप्तिवारणानुरोधेन च असंतनाभावघटितस्यैव साध्यत्वे तस्य विवक्षावश्यकतां प्रदर्शयिष्यत
न ह्यायुद्वित्वपटत्वह्यायुहितान्यतमकाभावानाव्याप्यवृत्तित्वमुपेपाद्यपृथिवीपदस्यैतत्पृथिवीपरत्वं यथोपपादितं तथाहि
तीयानुमानेपि संभवति तथा हि साध्याभावे व्याप्यवृत्तित्वं समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसाध्याभावत्व
वत्त्वं निरवच्छिन्नाधेयतावच्छेदकं साध्याभाव त्ववत्त्वं वेत्यतिव्याप्तिवारणानुरोधेनैवानिवेशनीयं॥ न तु स्वसमानाधिकर
णात्यन्ताभावप्रतियोगितायां सामानाधिकरण्येनावच्छेदके यद्भावनिष्ठत्वव्यक्तित्वं तत्त्वं निरवच्छिन्नवृत्तित्वं तत्तावच्छेदक
यद्भावनिष्ठं तत्त्वव्यक्तित्वं तत्त्वं वा दर्शितदिशानान्तत्वव्यक्तित्वेनाव्याप्यवृत्तित्वादेतदतिव्याप्तेः कालिकसंबंधावच्छिन्नप्र

व त्तियोगिताव्यतिरेकित्वावच्छिन्नाभावे साध्ये मेयत्वादौ निव्यासेश्च साध्याभावानां व्यतिरेकिणां सर्वेषामेव तत्तद्व्यक्तित्वेन काच्छि
काव्याप्यवृत्तित्वान्निरुक्तव्याप्यवृत्तित्वविरहेण व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् ॥ अपि च साध्याभावत्व
घटितव्याप्यवृत्तित्वलाघवे गुणसत्त्वसंयोगोभयाभावसाध्यके गुणत्वादावव्याप्तिरपि गुणसत्त्वस्य गुणत्वोभयाभावाभावत्वेनाव्या
प्यवृत्तित्वेऽपि तद्व्यक्तित्वेन व्याप्यवृत्तित्वेन तद्घटितत्वाधिकरणे हेतोर्वृत्तेरेवं च घटत्वद्रव्यत्वोभयत्वपटत्वद्रव्यत्वोभयत्वान्यतराभावा
नामप्यवश्यं विवक्षणीयसाध्याभावत्वघटितव्याप्यवृत्तित्वेन लक्षणघटकतया तद्घटितत्वाधिकरणे वायौ हेतोर्वृत्तेरति
व्याप्तिविरहाद्द्वितीयानुमानेऽपि पृथिवीपदस्येतत्पृथिवीपरत्वमुक्तमिति ॥ ननु तन्नान्यपृथिवीसमवेतत्वस्यान्यत्वसाध्यके
वायुरावर्त्तिव्याप्तिविरहेऽपि विभ्वसमवेतपृथिवीसमवेतत्वान्यत्वसाध्यकेऽतिव्याप्तिरस्त्येवेत्याशंकां निरस्यति ॥ विभ्विति ॥
मूर्त्तत्वस्य जातित्वरूपत्वमित्यभिप्रायेणेदमन्यथा नव्यमते नानाद्रव्याभावस्योत्पादिकालावच्छेदेन वायोः सत्त्वाद्याद्युत्त्वस्य व्यभिचा
रित्वानुपपत्तेः ॥ सकलेति ॥ अत्र तत्साकल्यविशेषणस्य प्रतिव्यावर्त्त्यमाणत्वात्तदुपादानं तत्सत्त्वेऽपि निव्याप्तिर्नहि यत इसे
वंपदार्थमित्येतदध्येयं रूपसामान्याभाववान् गुत्वादिसाध्यकपरेमतत्तद्द्व्यादेरेवोपादेयत्वयात्त्वम यदर्थासिद्धिस्तत्सा
ध्यके विशेषानुपादानेन तत्साध्यके व्यभिचारिण्यतिव्याप्तिरनवसाह ॥ अथवेति ॥ स्ववृत्तिसाध्याभावत्वव्यापकाधेयतानिरूपका
धिकरणवृत्तिसाध्याभावत्वव्यापकस्य वृत्तितावच्छेदकमधिकरणं यावत्तामित्यादेरर्थ इत्यथवेत्तिकस्याभिप्रायः ॥ शेषमिति ॥ तादृ

न्यायरत्न

वृत्ति शाहृदैत्वाभावमादायातिव्याप्तिवारणाय तादृशं यद्यत्स्वं तावदन्यतमवृत्तित्वलक्षणमनीयनप्रतियोगिताकत्वविवक्षण
मित्सर्यं॥ यद्यत्स्वमिति निवेशे तु द्वैयत्वं गौरवं चेत्तन्न आह॥ अथ यद्वेति॥ धर्मो विशेषणीय इति॥ तथा चाधेयतावच्छेदक
॥८५॥ साध्याभावमात्रवृत्तित्वाव्यवहितयोर्धर्मस्त्यन्यूनवृत्तित्वव्याप्यं यत्तदन्योयः साध्याभावमात्रवृत्तिव्यासज्यवृत्तिधर्मस्तद
वच्छिन्नाधिकरणतावृत्तित्वाभाववत्त्वं व्याप्तिरिति निष्कर्षः॥ न्यूनवृत्तित्वं सामानाधिकरण्यापघटितं॥ व्याप्यत्वं च सामा
नाधिकरण्यमात्रमिति॥ विवक्षितं॥ प्रतियोगितावच्छेदककोटौ मात्रपदानुपादानेऽधिकरणधर्मावच्छिन्नसाध्याभावमात्र
वृत्तिसमुदायत्वेतादृशाभावोदासीनसाधारणसमुदायत्वन्यूनवृत्तित्वव्याप्यत्वयोः सत्वेन तद्भिन्नसाध्याभावमात्रवृत्तिव्या
सज्यवृत्तिधर्माप्रसिध्या वाच्यत्वसाध्यकेऽव्याप्तिरतस्तन्निवेशः॥ व्यासज्यवृत्तित्वानिवेशे तु रूपाभावसाध्यके एकरूपव्यधि
करणधर्मावच्छिन्नसाध्याभाववृत्तिसमुदायत्वस्य सकलरूपमधिकरणधर्मावच्छिन्नसाध्याभावसाधारणो यः साध्याभाव
त्वरूपधर्मस्तन्न्यूनवृत्तित्वयानव्याप्यतया च तद्भिन्नतादृशधर्माप्रसिद्धिरतस्तन्निवेशः॥ आधेयतावच्छेदकत्वविशेषण
प्रयोजनं ग्रंथकृद्दर्शितं तेयं घटत्वादपुदासीनधर्माणामभेदनिवेशे गौरवमतो व्याप्यत्वनिवेशः स्वस्याप्रस्वव्याप्यत्वात् तद्भिन्न
तादृशधर्माप्रसिद्धिरतो न्यूनवृत्तित्वनिवेशः॥ अनुयोगिकोटौ मात्रपदानुपादाने वाच्यत्वसाध्यके व्यधिकरणधर्मावच्छिन्नसा
ध्याभावघटाधिकरणत्वेन द्वित्वरूपतादृशधर्मावच्छिन्नाधिकरणे हेतोर्वृत्त्याऽव्याप्तिरतस्तन्निवेशः॥ व्यभिचारिणि तादृशासा

मारापत्र

ध्याभाववत्त्वरूपधर्मावच्छिन्नाधिकरणत्वं जगत्त्वएवस्यादतो व्यासज्यवृत्तीति॥ समवनीयत्ताभावैक्यमतेतादृशधर्मान्तरस्त्वितादृशा
धर्मव्याप्यधर्माप्रसिध्यात्तद्भिन्नतादृशधर्माप्रसिद्धिस्तन्मन्नत्तव्याप्यत्वोभयाभावं भिन्नेत्यपवारणीया सत्तात्वस्य साध्यतावच्छेद
केप्यनिवेशोलाह। द्रव्यत्वविशिष्टेति॥ एतद्रूपान्यत्वविशिष्टेति। स्वरूपसमवायोभयसंबंधघटितसामानाधिकरण्यरूपवैशि
ष्ट्यंतत्स्वचैतद्रूपेपि सत्वात्तादृशवैशिष्ट्यावच्छिन्नप्रतियोगिताया॥ समवेतमात्रनिष्ठत्वं बोध्यं॥ उक्तपूर्वपक्षेकेषांचित्समाधा
नमाह॥ एवमपीति॥ प्रमेयसाध्यकेति॥ अयं साध्याभावे साधनसामानाधिकरण्यघटितास्मिन्कल्पे सद्धेतुमात्रएवव्यधिकरण
धर्मावच्छिन्नाभावस्यैवलक्षणघटकतयात्तस्य च साध्यसमानाधिकरणेत्यादिविशेषणाक्रांतगगनाभावभिन्नत्वासंभवेनासंभवस्यै
वप्रसक्तेः प्रमेयसाध्यकेसनुपपन्नं॥ नच समानाधिकरणधर्मेसाध्यवृत्तित्वदानेवन्हिसाध्यकेगगनाभावमादायनाप्रसिद्धिः॥ संभवती
सन्निप्रायेणेदमपि लिखाच्यं॥ वन्हिसाध्यकेपिव्यधिकरणस्वरूपसंबंधावच्छिन्नाभावमादायाप्रसिद्धेर्दुर्वारित्वात्॥ नचस्वरूपाधिव्यधिकर
णसंबंधावच्छिन्नाभावानां निवेक्षणीयसमानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वमितिवाच्यं॥ स्वरूपसंबंधेनवन्हित्वेनप्र
मेयसामान्याभावस्यतादृशात्तयात्तमादायैवाप्रसिद्धेः संभवात्॥ नचसमानाधिकरणसंबंधावच्छिन्नत्वमितिसस्यस्यावच्छेदकसंबंधा
वच्छिन्नाधेयतावच्छेदकधर्मावच्छिन्नत्वमथोवन्हित्वस्यतादृशाधेयतानवच्छेदकतयानतादृशाभावमादायाप्रसिद्धिरितिवाच्यं॥ तथास
तिगगनत्वेनप्रमेयसामान्याभावस्यातादृशानयातमादायाप्रसिद्धिवारणाय धर्मेसाध्यतावच्छेदकव्यापकत्वविशेषणप्रयोजनक
यनासंगतेः॥ नचसाध्यवद्वृत्तिभावेसमानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वं परिसज्यसाध्यतावच्छेदकसंबंधावच्छिन्नप्र

तियोगिताकत्वनिवेशाकल्पेवह्न्यादिसाध्यकेऽप्रसिद्ध्यभावइतिवाच्यं॥ एकत्वप्रागभावविशिष्टवह्नेः संयोगेनयोऽभावस्तमादा
याप्रसिद्धेरुक्तकल्पेऽपिदुर्वारत्वात्॥ अन्येतुसमाधानं॥ स्वरूपसंबंधेनवह्न्यभावैकत्वप्रागभावविशिष्टवह्न्यभावादीनादायवह्नि
साध्यकेऽप्रसिद्धिसंभवेऽपिसमानाधिकरणधर्मेसाध्यतावच्छेदकव्यापकत्वविशेषणेऽपितादृशाप्रसिद्धेर्वारणासंभवात्तद्वि
ग॰८६२॥ शेषणप्रयोजनंतत्रयानैषाप्रसिद्धिरप्रावयितुंशक्यतइतिप्रमेयसाध्यकस्थलानुधावनमिति॥ नचैकत्वप्रागभाव
ता स्याव्याप्यवृत्तितयानप्रतियोगितावैयधिकरण्याघटितसाध्यतावच्छेदकव्यापकत्वमितितादृशाभावस्यनसाध्यवद्वृत्तीमा
दिविशेषणाकांतत्वमितिवाच्यं॥ साध्यवद्वृत्तितादृशाभावस्योभयत्वादिनासाध्याभावएवप्रसिद्धेरुक्तत्वे॥ प्रतियोगिवैय
धिकरण्यघटितसाध्यतावच्छेदकव्यापकत्वस्यैवग्रंथकृदभिप्रेतत्वात्॥ यापुरःपव्यक्तिरेतद्घटविशिष्टोऽस्मिन्नेवाधिकरणे
ऽपरद्घटविशिष्टोऽन्यस्मिन्नेवाधिकरणेवर्तनेतादृशद्घटविशिष्टव्यक्तौसाध्यायांस्वाश्रयाद्घटनव्यक्तित्वोभयावच्छिन्न
निरूपकतानधिकरणत्वसंबंधेनप्रमेयत्वस्यहेतुतायामेतद्घटविशिष्टतद्व्यक्त्यभाववतद्घटविशिष्टतद्व्यक्त्यभावयोर्भिन्न
भिन्नव्यक्तित्वेनभावेनसाध्यनसमानाधिकरणधारकविशेषणाक्रांतत्वेनचतद्वृत्तितद्वाधिकरणहेतुतावच्छेदकसंबंधे
नेरसप्रसिद्ध्याऽव्याप्तिवारणायप्रतियोगिवैयधिकरण्यघटितसाध्यतावच्छेदकव्यापकत्वस्यसमानाधिकरणधर्मे
ऽवच्छेदेनिवेशनीयत्वाच्च॥ प्रतियोगितायांसमानाधिकरणसंबंधावच्छिन्नत्वनिवेशेसाध्याभावीयप्रतियोगितायां

सावच्छेदकसंबंधावच्छिन्नत्वं व्यर्थमिति तत्परित्यज्य साध्यतावच्छेदकसंबंधावच्छिन्नत्वं निवेश्यते ॥ समानेति ॥ उभयत्वा
दिना साध्याभावव एवेति यद्यपि साध्यवद्वृत्तीत्यादि विशेषणाक्रांत वन्हिगगनोभयत्वावच्छिन्नाभाववभिन्नसाध्याभावाप्रसिध्याऽ
संभवो दुर्वार एवं तथापि समानाधिकरणधर्मे साध्यवद्वृत्तीनानवच्छेदकव्यासज्यवृत्तिधर्मभिन्नत्वं निवेश्यान्नासंभव ॥ अ
त्रेदं चिंत्यं समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वोपादाने पि ज्ञेयत्वान्यप्रमेयत्वानवाच्यत्वादिसादौ साध्यवद्वृत्तितथावि
धो यो ज्ञेयत्वान्यप्रमेयत्वे न ज्ञेयत्वगगनान्यतराभाववत्त्वस्य केवलान्वयितया तदन्यसाध्याभावाप्रसिध्याऽव्याप्तिवारणाय सा
ध्यवद्वृत्त्यभावे स्वन्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वविशेषणस्यावश्यकतया तेनैव गगनत्वेन प्रमेयसामान्याभाव
वारणे समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणं व्यर्थमिति प्रतियोगितायां साध्यतावच्छेदकव्यापकत्ववि
शेषणवैयर्थ्यं दुर्वारमेव ॥ न च स्वन्यूनवृत्तित्वं स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वं तन्नभेदप्रतियोग्यवृत्ति
त्वमेव रूपं निवेशनीयमन्यथा साध्यवद्वृत्त्यभावप्रतियोगितावच्छेदकघटत्वादेः स्वसमानाधिकरणभेदप्रतियोगितावच्छेद
कत्वं तन्नभेदप्रतियोग्यवृत्तित्वमेव रूपं निवेशनीयमन्यथा साध्यवद्वृत्त्यभावप्रतियोगितावच्छेदकघटत्वादेः स्वसमानाधि
करणव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकं व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकं वा भेदमादाय तत्प्रति
योगितावच्छेदकतापर्यास्वन्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगितायाऽप्रसिध्यापत्तेस्तथा च साध्यगगनोभयाभावस्यापि ना

त

त दृष्टांतयोरप्रसिद्ध्येनसाध्याभावाप्रसिद्धिः। सद्धेतावव्याप्तेवेतिवाच्यं।। व्यासज्यवृत्तिधर्मसाधारणस्यपर्याप्तिरिक्तसंबंधावछिन्नताद
त्वाभेदप्रतियोगितावछेदकत्वरूपन्यूनवृत्तित्वस्यनिवेशेनोक्तदोषाभावात्।। किंचसत्तासाध्यकेद्रव्यगुणान्यत्वविशिष्ट
सत्ताभावानोप्यत्किंचित्समानाधिकरणधर्मावछिन्नप्रतियोगिताकाभावभिन्नत्वेनलक्षणघटकत्वंदुर्वारमेवसमानाधिक
९१ रणधर्मावछिन्नप्रतियोगिताकत्वस्यानुगतस्यैकस्याभावात्तादृशाभावभेदकूटमेवनिवेशनीयंतदपेक्ष्यासाध्यवद्वृत्त्यभावे
गगनाभावभिन्नत्वमेवलाघवादस्तुतन्नैवप्रमेयत्वेनगगनाभाववारणायप्रतियोगितायांसाध्यतावछेदकव्यापकत्वमिति।।
घटवृत्तित्वविशिष्टेति।। यद्यपिघटवृत्तित्वविशिष्टकाशाभावाभावेसाध्येसाध्यवद्वृत्तीत्यादिविशेषणाक्रांतगगनाभावभिन्ना
भावाप्रसिध्यैवनातिव्याप्तिस्तथापितुल्ययुक्त्यातत्साध्यकेसद्धेतौतादृशाभावाप्रसिध्याऽव्याप्तिवारणायसमानाधिकरण
धर्मावछिन्नाभावत्वेनसाध्यवद्वृत्तित्वविवक्षणीयात्तथाचेयमतिव्याप्तिरितिध्येयं।। साध्यनाधिकरणेएषांपरस्परमेकाधिकर
ण्यमिति।। यद्यप्येवंविवक्षायांवन्हिमान्वृत्तिवन्ह्यवयवसंयोगादिसत्त्वसंबंधद्वयावछिन्नप्रतियोगिताकसाध्याभावसमुदा
यस्यसाध्यनाधिकरणेऽसत्वान्नतत्रातिव्याप्तिवारणप्रयोजनकत्वंप्रतियोगितायांसाध्यतावछेदकसंबंधावछिन्नत्ववि
शेषणस्यसंभवति।। तथापिसाध्यतावछेदकसंबंधातिरिक्तसंबंधावछिन्नप्रतियोगिताकतादृशसाध्याभावसमुदायमाश
यासंभववारणप्रयोजनंतद्विशेषणस्यबोध्यं।। साध्यमेवेति।। पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादिसाशौजल्लासमवेत

त्वे तेजोऽसमवेतत्वावच्छिन्नाभावघटितकूटस्य साधनाधिकरणेऽसत्त्वादन्तिमासम्भावादित्यभावः ॥ ॥ इति कूटघटितलक्षण
णं ॥ उक्तविशेषणनिवेशाद् इति ॥ साध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावान्यत्वनिवेशाद् इत्यर्थः । साध्यव्यापकतावच्छेद
करूपावच्छिन्नाभावनिवेशेऽपि पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादिमत्त्वजलासमवेतत्वतेजोऽसमवेतत्वाद्यवच्छिन्ना
भावकूटमादायातिव्याप्तिवारणाय साध्यतावच्छेदकव्याप्यत्वं प्रतियोगितायामभावरूपकमित्यतिगौरवमिति शङ्कां निरस्यति । विशि
ष्टस्येति । अननुगतिरिक्तत्वेत्येति ॥ इदं च प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वनिवेशकल्पेऽपि पृथिवीन्यद्रव्यत्ववद्द्रव्यत्वा
दिसाधारणव्याप्यतावच्छेदकत्वसत्त्वेनायैव ॥ तथा च तद्धारकदर्शितविवक्षायामन्तर्भावरूपकत्वेनतयैव पृथिवीद्रव्यत्वप्रकार
न कप्रमाविषयत्वादिसाधारणजलाद्यसमवेतताभावमादायातिव्याप्तिवारणे प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वं न देयमिति
न गौरवं पुच्छलक्षणे इति भावः ॥ लक्षणघटकताप्रसक्तिरिति । तथा च तद्धारके साध्यवद्वृत्तीत्यादिविशेषणानावश्यकतयोः कू न
टघटितलक्षणे गौरवमित्याशयः ॥ वक्ष्यमाणत्वादिति । तत्स्य किं व्याख्यानावसर इत्यादि ॥ व्याख्यानमुपन्यस्यति । साधनेव
तीति । हेतुतावच्छेदकसंबन्धेन किंचित्पदार्थाधिकरणवृत्तयइति ॥ अत्र साध्याभाववदधिकरणनिरूपितवृत्तित्वांशे हेतुता
वच्छेदकसंबन्धावच्छिन्नत्वानिवेशेऽपि ताहशहेतुवृत्तित्वनिरूपकत्वस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य यावद्धेत
गतहेत्वधिकरणतावच्छेदेनासत्त्वादतिव्याप्तिविरहेण हेतुतावच्छेदकसंबन्धेन यत्किंचित्पदार्थाधिकरणवृत्तित्वमिति विशेषणाप्र
सिद्धतो ताहशहेतुवृत्तित्वनिरूपकत्वस्य अधिकरणधर्मावच्छिन्नाभावस्यैव प्रसिद्धेः ॥ परं तु हेतुतावच्छेदकसंबन्धेन वृत्तिमद्वृत्तयो

यावंतस्ताद्दशसाध्याभावकूटाधिकरणवृत्तित्वाभावा इति लक्षणघटकविशेषणापरित्यागेनैव सामानाधिकरण्यस्य व्याप्यवृ वृत्ति
त्तित्वकल्पे लक्षणपरिष्कारः संभवतीति ज्ञापयितुं साध्याभावकूटाधिकरणवृत्तित्वांशे हेतुतावच्छेदकसंबंधावच्छिन्नत्वघटितमेवल
॥ क्षणमभिप्रेतं तथा च तद्वैयर्थ्यं वृत्तित्वांशे हेतुतावच्छेदकसंबंधावच्छिन्नत्वविशेषणस्य च स्वरूपाभावसंपादकतयैव सार्थक्यमिति बोध्यं
॥ इति पुच्छलक्षणं ॥ ॥ विदुषां कंठभूषायै रघुनाथेन नीमिति ॥ सन्यायरत्ने संपूर्तिमगमन्मनुलक्षणी ॥ छ ॥ ॥ इति मीमां
सान्यायपंचास्य श्रीमद्राघवाचार्यशिष्यस्य पर्वतेइरूपनामकरघुनाथस्य कृतौ गदाधरी पंचवादटिप्पण्यां न्यायरत्नाभिधा
यां चतुर्दशलक्षणी समाप्ता ॥ ॥ छ ॥ श्री ॥ राम ॥ ॥

[OrderDescription]
,CREATED=18.08.20 15:18
,TRANSFERRED=2020/08/18 at 15:27:33
,PAGES=97
,TYPE=STD
,NAME=S0003518
,Book Name=M-2447-NYAY RATAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF

FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF

FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,